# संस्कृत सोपानम्

भाग 4



# संस्कृत सोपानम्

## भाग 4




*लेखक*

डॉ॰ सुरेन्द्र गम्भीर

एम॰ ए॰ (संस्कृत, भाषा-विज्ञान)
साहित्यशास्त्री, पी-एच॰डी॰
भू॰पू॰ अध्यक्षः, संस्कृत विभागः
मॉडर्न स्कूल, नई दिल्ली



## पीताम्बर पब्लिशिंग कम्पनी प्रा॰ लि॰

888, ईस्ट पार्क रोड, करौल बाग़, नई दिल्ली-110 005 (भारत)

**शाखाएँ**

**बैंगलोर** : आवास न॰ 6/2, III मेन रोड, एस॰के॰ गार्डेन, बेन्सन टाउन पोस्ट, बैंगलोर-560046 दूरभाष : 080-23534673
**चेन्नई** : 10, हंटर्स रोड, प्रथम तल, चुलाई, चेन्नई-600112 दूरभाष : 044-25322333
**हैदराबाद** : ए जी-18, शांति बाग अपार्टमैंट्स, बेगमपेट, हैदराबाद-500016 दूरभाष : 040-23737423
**जयपुर** : 113, इंद्रा कालोनी, बनी पार्क, जयपुर-302016 दूरभाष : 0141-2203440

प्रकाशक :
**पीताम्बर पब्लिशिंग कम्पनी प्रा॰ लि॰**
888, ईस्ट पार्क रोड, करौल बाग़, नई दिल्ली-110 005 (भारत)
दूरभाष : 23670067, 23522997, 23625528
फैक्स : 91-11-23676058, 91-11-25765754
ई-मेल : pitambar@bol.net.in

**संस्करण** : प्रथम, 1972
पुनर्मुद्रण, 1973, 1974, 1975
द्वितीय, 1976
पुनर्मुद्रण, 1976, 1977, 1978, 1979, 1980, 1981, 1982
तृतीय, 1983
पुनर्मुद्रण, 1984, 1985, 1986, 1987, 1988, 1989, 1990, 1991
चतुर्थ, 1992
पुनर्मुद्रण, 1993, 1994, 1995
पंचम, 1996
पुनर्मुद्रण, 1997, 1998, 1999, 2000
संशोधित एवं परिमार्जित संस्करण, 2001
पुनर्मुद्रण : 2002, 2003

**सर्वाधिकार** : © सुरक्षित

**प्रिय ग्राहक**
आपको जाली/नकली पुस्तकों से बचाने के लिए हमने इस पुस्तक में यह होलोग्राम चिपकाया हुआ है । यदि यह होलोग्राम यहाँ नहीं है तो कृपया पुस्तक को न खरीदें क्योंकि यह जाली/नकली हो सकती है । अगर आपको बिना होलोग्राम कोई पुस्तक प्राप्त हो तो कृपया हमें सूचित करें ।
**प्रकाशक**

**कोड नं.** : 12645

**ISBN** : 81-209-0549-0

**मूल्य** : 63/- रुपये

**आवरण :** (1) महाकवि कालिदास शकुन्तला की रचना करते हुए । (2) जर्मन विद्वान मैक्सम्यूलर — जिन्होंने संस्कृत ग्रंथों का अनुवाद जर्मन भाषा में किया तथा गीता-उपदेश का चित्र ।

**इस पुस्तक पर आधारित अभ्यास – पुस्तिका भी प्राप्य है।**

पीयूष प्रिंटर्स पब्लिशर्स प्रा० लि०, नई दिल्ली-41 द्वारा मुद्रित ।

# किञ्चित्



प्रस्तुतमाला-विषयकम्

भाषा-मनोविज्ञान-शास्त्रिणां शोधैः भाषा-शिक्षणमपि कला-रूपेण उपस्थापितम् । अल्पादपि अल्पतरे समये अधिकस्य शिक्षणस्य स्पर्धा सर्वत्र दृष्टिपथमवतरति । कस्या अपि भाषायाः शिक्षणस्य चतस्रः विधा भवन्ति, तथाहि-श्रवणं, वदनं, पठनं लेखनञ्चेति । परं संस्कृत-सदृश्यै भाषायै पठनं तदवगमश्चैव प्राधान्येन लक्ष्यीकृतं स्याद् इत्यस्ति व्यवस्थिता मनीषा भाषा-शास्त्र-विदाम् । गौणरूपेण पठनविधायाः साधनरूपेण वदनादि-विधा अपि अनुशील्यन्ताम् । सत्यमेतत् यत् भाषा-भाषणेन छात्राणां विश्वासो वर्धते रुचिश्चापि वृद्धिं गच्छति । एतद् विचार्यैव अत्र ललितानि संस्कृत-पद्यानि, दैनन्दिन-व्यवहार-पराणि कानिचित् सरल-संस्कृत-वाक्यानि च पुस्तकारम्भे दत्तानि । अनुदिनम् एतेषाम् अनुशीलनेन छात्राणां संस्कृत-भाषां प्रति अनुरक्तिवर्धिष्यते इत्याशासे । भाषा-शिक्षण-विधानां प्रधान्य-गौण-व्यवस्थाया विस्मरणं न भवेत् इत्यावश्यकम् । लक्ष्ये स्पष्टे पन्था अपि स्पष्टो जायते ।

प्रत्येकं पुस्तकं छात्रस्य आयुस्स्तरमावश्यकताञ्च विलोक्यैव प्रणीतम् । भाषा-ज्ञान-भित्तिः आदित एवं दृढमूला सुसंहता च भवेदिति दृशा सर्वमत्र क्रमिकं मितं नियतञ्चास्ति । प्रत्येकं शब्दः कयापि योजनयैव सन्निवेशितः । प्रस्तुत-मालायां शब्दा इत्थं प्रयुक्ताः, वाक्य-रचना एवमायोजिता व्याकरणञ्चेत्थं क्रमेण अल्पाल्पशः गुम्फितं येन बालः सारल्येनैव सर्वं शिक्षेत । क्रमिक-शिक्षणं क्रमिक-विकासाय आवश्यकम् । भाषा-शिक्षणेन साकं साहित्यस्य रुचिरा ललिताश्चांशाः सन्निवेशिताः । संस्कृत-वाङ्मय-महोदधि मंथनोत्थानि कथा-रत्नानि पद्य-रत्नानि निदर्शन-भूतानि चात्र गुम्फितानि । अन्यच्च, विज्ञान-संस्कृति-सामाजिक-ज्ञानादि-विषयान् अन्तरेण पाठा अपि चात्र सन्निविष्टा सन्ति ।



प्रत्येकं पाठस्योपरि पाठ्य-संकेतेन पाठे यदुद्दिष्टं तदवगमे सौकर्यं भविष्यति । सन्धीनां समासानां चाप्रयोगः सारल्यनिमित्तकः । पुस्तकस्यान्ते दत्तश्शब्दकोशः बालान् शब्दकोशस्यानुशीलनाय प्रवर्तयिष्यते । पाठेभ्यः व्यतिरिक्तमभ्यासेष्वपि अन्ये प्रोचकाः बुद्ध्युत्तेजकाः प्रयोगाः प्रश्नाश्च दत्ताः ।

वस्तुस्थितिरियं यत् न वयं छात्रेषु बहु आशास्महे । शिक्षाविदां तर्कानुभवानुमोदितं वचः यत् यावत छात्रेषु सम्भाव्यते तावत्येव ते कृत-प्रयत्नाः भवन्तीति शम् ।

–गम्भीरः

# विषय सूची


| पाठ: | | पृष्ठ: |
|---|---|---|
| प्रथम: | वंदना | 1 |
| द्वितीय: | संगति-प्रभाव: | 5 |
| तृतीय: | अवाञ्छित: उपदेश: | 8 |
| चतुर्थ: | न्यायालय: | 12 |
| पंचम: | संगणकम् (कम्प्यूटर:) | 16 |
| षष्ठ: | पण्डित-पुरन्दर: अम्बिकादत्त-व्यास: | 20 |
| सप्तम: | पत्रम् मित्रं प्रति | 24 |
| अष्टम: | यशोलिप्सु: कर्ण: | 28 |
| नवम: | स्वतंत्रता-संग्राम: (क) | 32 |
| दशम: | स्वतंत्रता-संग्राम: (ख) | 35 |
| एकादश: | सुपद्यानि | 38 |
| द्वादश: | गणतन्त्र-दिवस: | 43 |
| त्रयोदश: | नृत्य-कला | 47 |
| चतुर्दश: | पाण्डव-दूत: | 51 |
| पंचदश: | मैक्समूलर: | 55 |
| षोडश: | गीता | 58 |
| सप्तदश: | दुर्ललित: भरत: | 62 |
| अष्टादश: | संगीतम् | 66 |
| नवदश: | प्रकीर्ण-पद्यानि | 70 |
| विंशतितम: | गृध्र: मार्जार: च | 73 |
| एकविंशतितम: | भारतीया संस्कृति: | 77 |
| द्वाविंशतितम: | सूक्तय: | 82 |
| | व्याकरणम् | 86 |
| | शब्द-कोश: | 104 |

*Teaching Point :*

आत्मनेपदम्–लट्

प्रथमः पाठः

# वन्दना

पृथिवी मानुष्यम् वन्द् मलयजः शस्यम् श्यामल
ज्योत्सना यामिनी द्रुमः सुखद वरद



माता भूमिः पुत्रोऽहं पृथिव्याः —(अथर्ववेदः)
दुर्लभं भारते जन्म मानुष्यं तत्र दुर्लभम् —(अज्ञातम्)

वन्दे मातरम्!
सुजला सुफलां मलयज-शीतलाम्,
शस्य-श्यामलां मातरम्!
वन्दे मातरम्!

शुभ्र-ज्योत्सना-पुलकित-यामिनीम्,
फुल्ल-कुसुमित-द्रुमदल-शोभिनीम्,
सुहासिनीम्, सुमधुर-भाषिणीम्,
सुखदां वरदां मातरम्!
वन्दे मातरम्!

—श्री बंकिमचन्द्र-चट्टोपाध्यायः

## शब्दार्थाः

| | | | |
|---|---|---|---|
| पृथिवी | = | पृथ्वी, ज़मीन | (the earth) |
| दुर्लभ | = | कठिनता से मिलने वाला | (difficult to get) |
| मानुष्यम् | = | मनुष्य-रूप | (human form) |
| वन्द् | = | प्रणाम करना | (to salute) |
| सुजल | = | बहुत जलों (नदियों) से युक्त | (having many rivers) |
| सुफल | = | बहुत फलों वाला | (having many fruits) |
| मलयज | = | चन्दन वृक्ष | (sandal tree) |
| शीतल | = | ठंडा | (cool) |
| शस्यम् | = | अन्न, अनाज | (grains) |
| श्यामल | = | काला | (black) |
| शुभ्र | = | उज्ज्वल | (bright) |
| ज्योत्स्ना | = | चाँदनी | (moonlight) |
| पुलकित | = | प्रसन्न | (rejoiced) |
| यामिनी | = | रात | (night) |
| फुल्ल | = | खिला हुआ | (blossomed) |
| कुसुमित | = | फूलों से युक्त | (flowered) |
| द्रुमः | = | पेड़ | (tree) |
| दलम् | = | समूह | (large number) |
| शोभिनी | = | शोभा वाली | (elegant) |
| सुहासिनी | = | सुन्दर रूप से मुस्कुराने वाली | (one that smiles beautifully) |
| सुमधुर | = | बहुत मीठा | (very sweet) |
| भाषिणी | = | बोलने वाली | (speaker) |
| सुखद | = | सुख देने वाला | (giver of comfort) |
| वरद | = | श्रेष्ठ वस्तु देने वाला | (giver of the best) |

**नया धातु (New Root)—वन्द् A***

**नए विशेषण (New Adjectives)**

**विशेषणानि**

| | | |
|---|---|---|
| दुर्लभः | दुर्लभा | दुर्लभम् |
| सुजलः | सुजला | सुजलम् |
| सुफलः | सुफला | सुफलम् |
| शीतलः | शीतला | शीतलम् |

| | | |
|---|---|---|
| श्यामलः | श्यामला | श्यामलम् |
| शुभ्रः | शुभ्रा | शुभ्रम् |
| पुलकितः | पुलकिता | पुलकितम् |
| –यामिनीकः | –यामिनी (–यामिनीका) | –यामिनीकम् |
| फुल्लः | फुल्ला | फुल्लम् |
| कुसुमितः | कुसुमिता | कुसुमितम् |
| शोभी | शोभिनी | शोभि |
| सुहासी | सुहासिनी | सुहासि |
| सुमधुरः | सुमधुरा | सुमधुरम् |
| भाषी | भाषिणी | भाषि |
| सुखदः | सुखदा | सुखदम् |
| वरदः | वरदा | वरदम् |

## अभ्यासः

**पाठगतम्–**

1. मेरा सुन्दर भारत–इस विषय पर एक छोटा-सा निबन्ध लिखिए (Write a short essay on My Beautiful India).
2. 'भारत-माँ'–इस शब्द से क्या अभिप्रेत है (What is meant by Mother India) ?

**भाषा व्याकरणं च–**

3. 'वन्द्' के रूप लट् लकार में लिखिए (Conjugate वन्द् in लट्).
4. निम्नलिखित विशेषणों का उचित रूप बनाकर रिक्त स्थान भरिए (Fill in the blanks with the appropriate form of one of the following adjectives)—

दुर्लभ, सुजल, शुभ्र, पुलकित, सुखद, वरद ।

| | | |
|---|---|---|
| .................. प्रभुः | .................. विद्या | .................. धनम् |
| .................. देशः | .................. भूमिः | .................. राष्ट्रम् |
| .................. चन्द्रः | .................. रमा | .................. पिता |
| .................. बालः | .................. बाला | .................. देवः |
| .................. माता | .................. गृहम् | .................. वस्त्रम् |
| .................. शारदा | .................. दैवम् | .................. मित्रम् |

* आत्मनेपदी धातुओं के बाद इस पुस्तक में A चिह्न लगा रहेगा । Atmanepada roots will be marked with A throughout this book.

5. उत्तर दीजिए (Answer the following questions):
   (क) पाठे का माता कः च पुत्रः ?
   (ख) प्रथमस्य पाठस्य चित्रे बालाः किं कुर्वन्ति ?
   (ग) किं त्वं प्रातः पितरौ वन्दसे ?
   (घ) किं छात्राः विद्यालयम् आगत्य गुरून् वन्दन्ते ?

6. अनुवाद कीजिए (Translate)—
   (क) हम सब अपने देश को प्रणाम करते हैं । (We salute our country).
   (ख) हमारे बाग़ में फूलों वाले वृक्ष हैं । (In our garden there are flower trees).
   (ग) गर्मियों में ठंडा पानी मुश्किल से मिलता है । (In summer, cold water is hard to get).
   (घ) उज्ज्वल चाँदनी बड़ी सुखदायक होती है । (Bright moonlight is very comforting).
   (घ) प्रिय देश भारत को नमस्कार! (Salutations to my beloved country India !)

□□



*Teaching Point :*
(i) क्तवतु
(ii) सः एषः + any consonant
↓ ↓
(विसर्गलोप)

द्वितीयः पाठः

# संगति-प्रभावः

शूकरः अनु+सृ (सर्) गवाशनः आवासः प्र+आप्
उपरि प्र+हृ (हर्) उच्चैः आ+क्रुश् श्रु
आर्यः विसदृश शीलम् अन्तरा भिद्



आसीत् निषध-देशे चित्रसेनः नाम नृपः । स कदाचित् मृगयार्थं वनं गतवान् । तत्र स कञ्चन शूकरं दृष्ट्वा तम् अनुसृतवान् । अचिरमेव स गवाशनानाम् आवासं प्राप्तवान् । गिरिकः नाम कश्चित् शुकः वृक्षस्योपरि स्थितः आसीत् । एष दूरतः एव नृपं दृष्ट्वा 'प्रहरत प्रहरत! मारयत मारयत! एतस्मात् सर्वस्वं हरत' इति उच्चैः आक्रोशत् । तत् श्रुत्वा नृपः विस्मितोऽभवत् दूरतः एव चान्यत्र चलितवान् ।

अचिरमेव स मुनीनाम् आश्रमं प्राप्तवान् । तत्र एकः अन्यः शुकः तं दृष्ट्वा उदितवान्—आर्य, प्रविश, स्वागतम्! अये, जलं फलानि च आर्याय आनय इति ।

तत् श्रुत्वा विस्मितः नृपः शुकं पृष्टवान्—एतस्मिन् एव वने एकः अन्यः शुकः अपि वसति । स परुषाणि वचनानि वदति त्वं च मधुराणि एव । त्वमपि शुकः, सोऽपि शुकः । समाना एव जातिः । कथं युवां विसदृशौ शीलेन । कथमेतत् अन्तरं तं त्वां चान्तरा ?

शुकः प्रत्युदितवान्—श्रीमन्, न केवलं जातिः एव समाना, आवां सहोदरौ । तं गवाशनाः नीतवन्तः मां च मुनयः अत्र आनीतवन्तः । स गवाशनानां वचनानि आकर्णयति अहं च मुनीनाम् । अतः भिद्यावहे शीलेनावाम् । संगतेः एव एष परिणामः ।

## शब्दार्था :

| | | | |
|---|---|---|---|
| शूकरः | = | सूअर | (hog) |
| अनु+सृ (सर्) | = | पीछे जाना | (to follow) |
| गवाशनः | = | जाति से बहिष्कृत, चाँडाल | (outcast) |
| आवासः | = | निवास, बस्ती | (place of residence) |
| प्र+आप् | = | प्राप्त करना, पहुँचना | (to obtain, to reach) |
| उपरि | = | ऊपर | (above) |
| प्र+हृ (हर्) | = | आघात करना | (to hurt) |
| उच्चैः | = | जोर से | (loudly) |
| आ+क्रुश् | = | गाली देना | (to abuse) |
| श्रु | = | सुनना | (to listen) |
| आर्य | = | सज्जन | (gentleman) |
| स्वागतम् | = | स्वागत | (welcome) |
| अये | = | अरे | (oh) |
| परुष | = | कठोर | (harsh) |
| विसदृश | = | अलग-अलग, भिन्न | (dissimilar) |
| शीलम् | = | स्वभाव | (nature) |
| अन्तरम् | = | अन्तर, फ़र्क | (difference) |
| अन्तरा | = | बीच में | (between) |
| भिद् (भिद्य्) | = | अलग-अलग होना | (to be different) |

**नए धातु** (New Roots) –श्रु, भिद् (भिद्य्) A

**नए उपसर्ग-युक्त धातु** (New Prefixed Roots)—

अनु+सृ (सर्)  प्र+आप्  प्र+हृ (हर्)  आ+क्रुश्

**नए विशेषण** (New Adjectives) –

| | | |
|---|---|---|
| आर्यः | आर्या | आर्यम् |
| परुषः | परुषा | परुषम् |
| विसदृशः | विसदृशा | विसदृशम् |

**नए अव्यय** (New Indeclinables)—उपरि, उच्चैः, अये, अन्तरा

**उपपद-विभक्तिः**

(i) अनु के योग में आए शब्द में **द्वितीया** विभक्ति आती है ।

(ii) अन्तरा के योग में आए दोनों शब्दों में **द्वितीया** विभक्ति आती है ।

**विशेषः**

'किम्' के रूपों को अनिश्चयवाचक विशेषण बनाने के लिए **'चित्'** के स्थान पर **'चन'** भी आ सकता है (We can use चित् or चन् after किम् for making indefinite adjectives)

## अभ्यासः

**पाठगतम्–**

1. इन दो तोतों के माध्यम से लेखक हमें क्या कहना चाहता है (What is the writer trying to tell us through these parrots) ?
2. मनुष्य पर अच्छी संगति का प्रभाव जल्दी पड़ता है या बुरी संगति का? उदाहरण देकर स्पष्ट कीजिए (What affects more—good company or bad company ? Support your answer with examples.)

**भाषा व्याकरणं च–**

3. यथापृष्ट रूप लिखिए (Provide the forms as required) —

| | | | |
|---|---|---|---|
| गम्+क्तवतु पुंल्लिगम् | .................... | .................... | .................... |
| वद्+क्तवतु स्त्रीलिंगम् | .................... | .................... | .................... |
| प्रच्छ्+क्तवतु स्त्रीलिंगम् | .................... | .................... | .................... |
| सृ+क्तवतु पुंल्लिगम् | .................... | .................... | .................... |
| आप्+क्तवतु स्त्रीलिंगम् | .................... | .................... | .................... |

4. सन्धि या सन्धिच्छेद कीजिए (Join or disjoin)—
सः बालकः, एष वृक्षम्, स आवासे, सः शुकः, एषः नृपाय, स आश्रमः, एष शूकरम्, एष वने, इत्यपि, विस्मितोऽयम् वृक्षस्योपरि, चान्तरा ।

5. उत्तर दीजिए (Answer the following):
(क) नृपः वनं किमर्थं गतवान् ?
(ख) प्रथमः शुकः नृपाय किमकथयत् ?
(ग) नृपः द्वितीयाय शुकाय किमकथयत् ?
(घ) संगतेः प्रथमे शुके कः प्रभावोऽभवत् ?

6. अनुवाद कीजिए (Translate the following):
(क) कथा सुनकर हम क्या करेंगे? (What shall we do after listening to the story ·
(ख) महाराष्ट्र और तामिलनाड् के बीच में मैसूर है । (Mysore lies between Maharashtra and Tamilnadu).
(ग) शिष्य भी गुरु के पीछे चले गए । (Disciples followed the teacher).
(घ) अरे, ज़ोर से बोलो । (Oh! speak louder).
(ङ) पेड़ों पर मत बैठो । (Don't sit on trees).

□□

*Teaching Point :*
शानच्

तृतीयः पाठः

# अवाञ्छितः उपदेशः

नीडम्  धारासारः  वर्ष्  कम्प्  बाध्  आर्त
हन्त  वेप्  क्लिश्  उपदेष्टृ  कुपित  प्रकोपः
पयःपानम्  भुजंगः



गंगा-तटे आसीत् कश्चन वृक्षः । तत्र अनेकानि नीडानि आसन् येषु खगाः स्वैः शावकैः सह सुखेन वसन्ति स्म ।

एष वर्षर्तुः आसीत् । एकस्मिन् दिने धारासारैः अवर्षत् देवः । स्वान् प्राणान् रक्षितुं सर्वे पशवः इतस्ततः अधावन् । केचित्तु किञ्चित् शरणमविन्दन् अन्ये तु बहिः एव कम्पमानाः स्थितवन्तः । शीतं तान् सर्वान् बाधते स्म । परं खगाः अतीव आनन्दिताः आसन् । ते सुखेन स्वेषु नीडेषु कूजन्ति स्म ।

तदा कश्चित् वानरः तरु-तले आगतवान् । तं शीतार्तं दृष्ट्वा स्वनीडात् एकः खगोऽवदत्–'हन्त वानर, त्वं शीतेन वेपमानः क्लिश्यमानः च तिष्ठसि । मनुष्यस्य इव ते अपि हस्तौ पादौ च सन्ति । पश्य, वयं निर्बलाः अपि स्वगृहाणि रचयित्वा सुखेन निवसामः' इति ।

वानरः क्षुद्रम् उपदेष्टारं दृष्ट्वा तस्मै भृशमक्रुध्यत् अचिन्तयत् च–क्षुद्रोऽयं जन्तुः माम् उपदिशतीति। वर्षायाः अनन्तरं कुपितः वानरः उत्पत्य वृक्षं गत्वा खगानां नीडानि अनाशयत्।

सत्यमेव यत्–

उपदेशः हि मूर्खाणां प्रकोपाय न शान्तये।
पयःपानं भुजङ्गानां केवलं विष-वर्धनम्।।

**शब्दार्थाः**

| | | | |
|---|---|---|---|
| अवाञ्छित | = | अनचाहा | (unwanted) |
| तटम् | = | तट | (shore) |
| नीडम् | = | घोंसला | (nest) |
| वर्षर्तुः | = | वर्षा ऋतु | (rainy season) |
| धारासारः | = | मूसलाधार | (non-stop rain) |
| वर्ष् | = | बरसना | (to rain) |
| शरणम् | = | शरण | (refuge) |
| कम्प् | = | काँपना | (to shiver) |
| शीतम् | = | सर्दी | (cold) |
| बाध् | = | तंग करना | (to trouble) |
| तलः | = | नीचे का भाग | (below) |
| आर्त | = | दुःखी | (distressed) |
| हन्त | = | अरे | (oh !) |
| वेप् | = | काँपना | (to shiver) |
| क्लिश् | = | दुःखी होना | (to be distressed) |
| निर्बल | = | कमज़ोर | (weak) |
| नि + वस् | = | रहना | (to live) |
| उपदेष्टृ | = | उपदेशक | (advisor) |
| वर्षा | = | बारिश | (rain) |
| कुपित | = | क्रोधित | (angry) |
| हि | = | वास्तव में | (indeed) |
| प्रकोपः | = | क्रोध | (anger) |
| पयःपान | = | दूध पिलाना | (serving milk) |

| | | | |
|---|---|---|---|
| भुजंगः | = | साँप | (snake) |
| विषम् | = | ज़हर | (poison) |
| वर्धनम् | = | बढ़ाना | (increasing) |

**नए धातु** (New Roots) वर्ष्, कम्प् A, बाध् A, वेप् A, क्लिश् A

**नया उपसर्ग-युक्त धातु** (New Prefixed Root) नि + वस्

**नए विशेषण** (New Adjectives)—

| | | |
|---|---|---|
| अवाञ्छितः | अवाञ्छिता | अवाञ्छितम् |
| आर्तः | आर्ता | आर्तम् |
| निर्बलः | निर्बला | निर्बलम् |
| उपदेष्टा | उपदेष्ट्री | उपदेष्टृ |
| कुपितः | कुपिता | कुपितम् |

**नये अव्यय** (New Indeclinables)— हन्त, हि

**नये मुहावरे** (New Idioms)— देवः वर्षति, शीतं बाधते

**विशेषः**

'युष्मद्' शब्द के षष्ठी विभक्ति एकवचन में दो रूप होते हैं–'तव' या 'ते'। परन्तु 'ते' वाक्य के आरम्भ में नहीं आता। (युष्मद् has two genetive Singular forms –तव and ते। The second form ते does not occur in the beginning of a sentence).—

**पाठगतम्–**

1. कथा का सार है कि मूर्ख को उपदेश न दिया जाए। परन्तु यदि मूर्ख को उपदेश न दिया जाए तो वह निरा मूर्ख ही रह जाएगा। ऐसी अवस्था में क्या किया जाए? युक्ति-संगत उत्तर दीजिए? (The moral of the sotry is that we should not give advice to foolish people. But it is also true if a foolish person is not given any advice he or she will continue to remain foolish. In such a situation, what should we do? Support your answer with arguments.)

**भाषा व्याकरणं च–**

2. यथापृष्ट रूप लिखिए (Give forms as required)—

| | पुंल्लिगम् | स्त्रीलिंगम् | नपुंसकलिंगम् |
|---|---|---|---|
| वन्द् + शानच् | ............ | ............ | ............ |
| कम्प् + शानच् | ............ | ............ | ............ |
| बाध् + शानच् | ............ | ............ | ............ |
| क्लिश् + शानच् | ............ | ............ | ............ |

3. अव्यय छाँटिए (Select indeclinables)—
शरणम्, अये, पृथिवी, आर्त, हन्त, हि, इत्थम्, अन्तरिक्षम्, अतीव, अन्तरा, तटम्, उच्चैः, कारणम् ।

## संस्कृत लेखनम्

4. संस्कृत-पर्याय दीजिए (Give Sanskrit synonyms)—
वर्षा, प्रकोपः, कुपितः, कम्प्, गमय्, ज्ञा, वन्द् ।

5. अनुवाद कीजिए (Translate)—
   (क) माँ को नमस्कार करती हुई लड़की प्रसन्न है । (Bowing to mother the girl feels happy).
   (ख) सर्दी से दुःखी बन्दर काँप रहा है । (The distressed monkey is shivering with cold).
   (ग) बाहर मूसलाधार वर्षा हो रही है । (Outside, it is raining heavily).
   (घ) जीवन में मूर्ख ही दुःखी रहते हैं । (Only foolish people remain distressed in life).
   (ङ) बच्चों को सर्दी नहीं लगती । (Children do not feel cold).

□□



*Teaching Point :*
णिच्

चतुर्थः पाठः

# न्यायालयः

वि+वद् नृत् लिपिकः लेख्यम् अवधानम्
यथाकालम् उप+स्थापय् वैत्तिक तथ्यम् सम्यक्
प्रायेण अभिवक्ता युक्तिः प्रति+क्षिप्
प्रमाणीकृ खण्डय्



न्यायस्य आलयः एव न्यायालयः भवति । विवदमानौ पक्षौ अत्रागत्य न्यायमिच्छतः । अत्र एकः न्यायाधीशः वर्तते । एकः च तस्य सहायकः लिपिकः भवति । एष लिपिकः सर्वाणि लेख्यानि अवधानेन रक्षति यथाकालं च तानि न्यायाधीशस्य सम्मुखम् उपस्थापयति। न्यायाधीशः यत् किञ्चित् अपि लेखयितुमिच्छति सः तेन लिपिकेन लेखयति ।

केचन न्यायालयाः वैत्तिक-विवादेभ्यः एव भवन्ति, अन्ये च दुश्चरित्राणाम् अभियोगेभ्यः भवन्ति । अभियोगेषु द्वौ पक्षौ भवतः । न्यायाधीशः द्वयोः एव पक्षयोः कथनानि आकर्णयति । कदापि राज्यमेव एकतरः पक्षः भवति । न्यायाधीशः सर्वाणि तथ्यानि सम्यक् विचार्य स्वं निर्णयं श्रावयति ।

न कोऽपि जनः प्रायेण स्वं पक्षं स्वयमेव उपस्थापयति । द्वयोः एव पक्षयोः अभिवक्तारौ भवतः । अभिवक्ता एव एकं पक्षं तर्कपूर्वकं स्थापयति, अन्यस्य पक्षस्य चाभिवक्ता ताः युक्तीः प्रतिक्षिपति ।

न्यायालयाः त्रिविधाः भवन्ति । प्रथमः माण्डलिकः न्यायालयः । एष न्यायालयः प्रत्येकं नगरे एव प्रायेण वर्तते । महानगरेषु एकाधिका अपि न्यायालयाः भवन्ति । यदि कस्मैचित् अपि पक्षाय माण्डलिक-न्यायालयस्य न्यायः मान्यः न भवति तदा सः तस्य न्यायस्य विरोधे उच्च-न्यायालयं प्रमाणीकरोति । अस्य न्यायालयस्यापि निर्णयः न मान्यः भवेत् चेत् तदा देशस्य सर्वोच्च-न्यायालयं प्रमाणीकरोति । सर्वोच्च-न्यायालयस्य निर्णयः एव अन्तिमः भवति । न तं खण्डयितुं कोऽपि समर्थः

## शब्दार्थाः

| | | | |
|---|---|---|---|
| न्यायालयः | = | अदालत | (court of law) |
| न्यायः | = | इंसाफ़ | (justice) |
| आलयः | = | घर | (house) |
| वि + वद् | = | झगड़ा करना | (to dispute) |
| पक्षः | = | पक्ष | (side) |
| न्यायाधीशः | = | न्यायाधीश | (judge) |
| वत् | = | होना | (to be) |
| लिपिकः | = | स्टेनोग्राफ़र | (Stenographer) |
| लेख्यम् | = | महत्त्वपूर्ण काग़ज़ | (document) |
| अवधानम् | = | ध्यान | (care) |
| न्यायालयः | = | अदालत | (court of law) |
| यथाकालम् | = | समयानुसार | (at proper time) |
| उप + स्थापय् | = | सामने रखना | (to present) |
| वैत्तिकः | = | धन सम्बन्धी | (financial) |
| विवादः | = | झगड़ा | (dispute) |
| दुश्चरित्र | = | बुरे चरित्र वाला | (bad character) |
| अभियोगः | = | मुकदमा | (legal case) |
| कथनम् | = | कहना, उक्ति | (statement) |
| तथ्यम् | = | असलियत | (fact) |
| सम्यक् | = | अच्छी प्रकार से | (properly) |
| वि + चारय् | = | विचार करना | (to think) |

| | | | |
|---|---|---|---|
| निर्णयः | = | फ़ैसला | (judgement) |
| प्रायेण | = | अक्सर | (often) |
| अभिवक्तृ | = | वकील | (lawyer) |
| तर्क-पूर्वकम् | = | तर्कों के साथ | (logically) |
| युक्तिः | = | दलील | (argument) |
| प्रति + क्षिप् | = | दलील काटना | (to refute) |
| त्रिविध | = | तीन प्रकार का | (of three kinds) |
| माण्डलिक | = | मंडल-सम्बन्धी | (divisional) |
| विरोधः | = | विरोध | (opposition) |
| उच्च-न्यायालयः | = | उच्च-न्यायालय | (high court) |
| प्रमाणी + कृ | = | अपील करना | (to appeal) |
| मान्य | = | मानने योग्य | (agreeable) |
| चेत् | = | यदि | (if) |
| सर्वोच्च-न्यायालय : | = | सर्वोच्च न्यायालय | (Supreme Court) |
| अन्तिम | = | आख़िरी | (final) |
| खण्ड् | = | तोड़ना | (to break) |

**नए धातु** (New Roots) – वृत् A, खण्ड्

**नए उपसर्ग-युक्त धातु** (New Prefixed Roots) —

वि + वद् A, उप् + स्थापय्, वि + चारय्, प्रति + क्षिप्, प्रमाणी + कृ

**नए विशेषण** (New Adjectives)–

| | | |
|---|---|---|
| वैत्तिकः | वैत्तिकी | वैत्तिकम् |
| दुश्चरित्रः | दुश्चरित्रा | दुश्चरित्रम् |
| त्रिविधः | त्रिविधा | त्रिविधम् |
| माण्डलिकः | माण्डलिकी | माण्डलिकम् |
| मान्यः | मान्या | मान्यम् |
| अन्तिमः | अन्तिमा | अन्तिमम् |

**नए अव्यय** (New Indeclinables)—

यथाकालम्, सम्यक्, प्रायेण, चेत्

## अभ्यासः

**पाठगतम्–**

1. यदि न्यायालय न होते तो क्या स्थिति हाती ? (If there were no courts of law what would be the condition?)

2. विभिन्नन न्यायालयों में न्यायाधीशों की नियुक्ति कौन करता है ? (Who appoints judges in different courts ?)

**भाषा व्याकरणं च–**

3. णिजन्त रूप बताइए (Make causatives) देखिए पृष्ठ (See page 101)
   लिख्, स्था, श्रु, चर्
4. आत्मनेपदी एवं परस्मैपदी धातुएँ अलग-अलग कीजिए (Separate Atmanepada and Parasmaipada roots)–
   वृत्, वन्द्, खण्डय्, क्लिश, वद्, वि + वद्, वर्ष, वेप्

**संस्कृत-लेखनम्**

5. उत्तर दीजिए (Answer)–
   (क) न्यायालये लिपिकः किं करोति ?
   (ख) न्यायाधीशः न्यायं कथं करोति ?
   (ग) न्यायालयाः के सन्ति ?
6. अनुवाद कीजिए (Translate)–
   (क) न्यायाधीश अच्छी प्रकार से विचार करे। (The judge should consider it well).
   (ख) सारे महत्त्वपूर्ण काग़ज़ उपस्थित करो। (Present all the important documents).
   (ग) इन युक्तियों को कौन काट सकता है ? (Who can rebut these arguments).
   (घ) रास्ते में वर्तमान आदमी घोषणा कर रहा है। (A man standing on the way is making an announcement).
   (ङ) आज गुरु लोग परिणाम सुनाएँ। (Today, the teachers should announce the result).

□□



*Teaching Point :*
(i) वाच्य, (ii) महत्‌–declension

पञ्चमः पाठः

# संगणकम् (कम्प्यूटरः)

कौतुकम् अतिक्रान्त उपकल्पनम् निमिषः विषम
यथार्थतः सूक्ष्मता शक् समाधानम् मृष्
रचयिता कीदृश



विज्ञानस्य एतत् युगम् । यत्र कुत्रापि दृष्टिः गच्छति तत्रैव विज्ञानेन आविष्कृतं किमपि दृश्यते । गृहं स्यात् कार्यालयः वा, आपणः स्यात् उद्योगालयः वा, सर्वत्रैव विज्ञानस्य चमत्कारान् पश्यामः ।

अपि चन्द्रयात्रा भवेत् मंगलयात्रा वा, नानुभूयते किमपि कौतुकमद्य । नवीनेन आविष्कारेण विगतः आविष्कारः अतिक्रान्तः दृश्यते । किं यन्त्रमपि मस्तिष्क-युक्तं भवितुमर्हति इति केन पूर्वं चिन्त्यते स्म । परं सत्यमेवैतत् यत् मस्तिष्कमपि भवति यन्त्रेषु । तानि यन्त्राणि आकर्णयन्ति, विचारयन्ति विचारस्य पश्चात् च समुचितानि उत्तराणि यच्छन्ति ।

किमेतत् यन्त्रम् ? किं ज्ञायते युष्माभिः ? एतस्याभिधानम् अस्ति संगणकम् (कम्प्यूटरः) इति । महत्सु आपणेषु विक्रयस्य गणना, महत्सु उपाहारगृहेषु मूल्य-पत्रकाणाम् उपकल्पनं निमिषेणैव संगणकस्य सहायतया भवति ।

एतत् संगणकं द्विविधं भवति–आंकिकम् (डिजिटल) विश्लेषकं (ऐनलाग) च । प्रथमेन तावत् विषमतमानामपि गणनानां विधानं क्षणेनैव क्रियते । निर्वाचनस्य मतानां गणना स्यात्, चन्द्रयात्रायाः कार्यक्रमः वा स्यात्, विविधानां परीक्षाणां परिणामस्य उपकल्पनं वा भवेत्, सर्वमपि एतत् आंकिकेन संगणकेन यथार्थतः सूक्ष्मतया च कर्तुं शक्यते ।

विश्लेषकं च संगणकं समस्यानां समाधानं करोति । विविधानां विषयाणां समस्याभ्यः विविधाः संगणकाः भवन्ति । तस्यैव विषयस्य या काऽपि समस्या भवेत्, सा तस्य पुरः उपस्थाप्यते । तस्य उत्तरं द्राक् एव तेन दीयते । यदि उत्तरं न ज्ञायते तदा संगणकेन कथ्यते–'मृष्यतु भवान् । न ज्ञायते' इति ।

महत् एतत् यन्त्रम् । परं कोऽस्ति एतस्य रचयिता ? कीदृशी महती बुद्धिः भवेत्तस्य इति चिन्तयत ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| आविष्कृत | = | आविष्कार किया हुआ | (invented) |
| कार्यालयः | = | दफ़्तर | (office) |
| उद्योगालयः | = | कारख़ाना | (industrial house) |
| आविष्कारः | = | आविष्कार | (invention) |
| विगत | = | पिछला | (last) |
| अतिक्रान्त | = | पीछे रहा हुआ | (surpassed) |
| यन्त्रम् | = | मशीन | (machine) |
| मस्तिष्कम् | = | दिमाग़ | (brain) |
| अर्ह | = | योग्य होना | (to be able) |
| समुचित | = | बिल्कुल उचित | (very appropriate) |
| उत्तरम् | = | जवाब | (answer) |
| विक्रयः | = | बिक्री | (sale proceeds) |
| गणना | = | गिनती | (counting) |
| मूल्यपत्रकम् | = | बिल | (bill or invoice) |
| उपकल्पनम् | = | तैयार करना | (preparing) |
| महत् | = | बड़ा | (big) |
| निमिषः | = | पलक-मात्र | (twinkle of an eye) |
| उपाहारगृहम् | = | होटल | (hotel) |

| | | | |
|---|---|---|---|
| द्विविध | = | दो प्रकार का | (of two kinds) |
| विषम | = | कठिन | (difficult) |
| विधानम् | = | करना | (doing) |
| निर्वाचनम् | = | चुनाव | (election) |
| मतम् | = | वोट | (vote) |
| यथार्थतः | = | ठीक रूप से | (accurately) |
| सूक्ष्मता | = | बारीकी | (precision) |
| शक् | = | सकना | (to be able) |
| समस्या | = | समस्या | (problem) |
| समाधानम् | = | संदेह-निवारण | (clearing doubt) |
| विषयः | = | विषय | (subject) |
| मृष् | = | क्षमा करना | (to pardon) |
| रचयितृ | = | बनाने वाला | (maker) |
| कीदृश | = | कैसा | (of what sort) |

**नया रूप** (New Declension) –महत् (पृष्ठ 87)

**नए धातु** (New Roots) –अर्ह्, शक्, मृष्

**नए विशेषण** (New Adjectives)

| | | |
|---|---|---|
| आविष्कृतः | आविष्कृता | आविष्कृतम् |
| विगतः | विगता | विगतम् |
| अतिक्रान्तः | अतिक्रान्ता | अतिक्रान्तम् |
| समुचितः | समुचिता | समुचितम् |
| महान् | महती | महत् |
| विषमः | विषमा | विषमम् |
| रचयितृ | रचयित्री | रचयितृ |
| कीदृशः | कीदृशी | कीदृशम् |

**विशेष:**

विधिलिङ् प्रयोग वाले वाक्य के आरम्भ में 'अपि' का प्रयोग होता है–**सम्भावना** के अर्थ में (अपि is used in the beginning of a sentence with a विधिलिङ् verb form. The meaning conveys probability).

## अभ्यासः

**पाठगतम्–**

1. संगणक कितने प्रकार के होते हैं और उनका कार्य क्या-क्या है ? (What are different types of computers and what are their functions ?)

**भाषा व्याकरणं च–**

2. 'महत्' के उचित रूपों से रिक्त-स्थानों की पूर्ति कीजिए (Fill in the blanks with appropriate forms of महत्)—

| | | |
|---|---|---|
| ......जनाः | ......नार्यः | ......नगरी |
| ......यात्राम् | ......बालेषु | ......गणना |
| ......लतासु | ......प्रभुणा | ......शारदायै |

**संस्कृत लेखनम्–**

3. संस्कृत-शब्दान् लिखत (Give equivalents in Sanskrit)—
पिछला, कैसी, रचना करने वाली, चुनाव, पलक, बिल, बिक्री ।

4. अनुवाद कीजिए (Translate)—
   (क) यह गिनती उससे ज़्यादा मुश्किल है । (This number system is more difficult than that).
   (ख) कम्प्यूटर बिल्कुल ठीक तरह से गिन सकता है । (A computer can count very precisely).
   (ग) क्षमा कीजिए, मैं होटल नहीं जा सकता । (Excuse me, I cannot go to the hotel).
   (घ) मातृभूमि हमारे लिए क्या नहीं करती ? (What doesn't our motherland do for us ?)
   (ङ) हमारे द्वारा महान् पुरुष देखे जाते हैं । (Great people are seen by us).
   (च) वह क्यों हँसता है ? *(कर्मवाच्य)* । (Why does he laugh ?) (*in Passive*)

□□



*Teaching Point :*
(i) क्त्, (ii) इदम्–declension

षष्ठः पाठः

# पण्डित-पुरन्दरः अम्बिकादत्त-व्यासः

पुरन्दरः गद्यम् निकषः साहित्यिक विश्रुत
समकालिक प्रांजल रोचिष्णु अति+रिच् प्र+नी
शतावधान प्र+शंस् रुच् अन्तरायः



गद्यं कवीनां निकषं वदन्तीति साहित्यिकानां मण्डले प्रसिद्धा उक्तिः। संस्कृत-साहित्ये पद्ये एव रचना अधिकम् अधिगम्यते। गद्यस्य लेखकाः न सन्ति बहवः। सुबन्धुः दण्डी बाणभट्टः चेति त्रयः एव विश्रुताः गद्ये कृतिकाराः। अम्बिकादत्त-व्यासेन अपि गद्ये एव लिखितम्। श्री व्यासः हिन्दी-भाषायाः प्रसिद्धस्य लेखकस्य भारतेन्दु-हरिश्चन्द्रस्य समकालिकः आसीत्।

श्री व्यासः संस्कृते शिवराजविजयः इति नाम उपन्यासं लिखितवान्। शिवाजी-वीरस्यैव कथात्र गुम्फिता। हिन्दी-भाषायाः उपन्यासस्य शैली एव तेनात्र अनुसृता। उपन्यासे द्वादश निःश्वासाः वर्तन्ते। भाषाऽस्ति अतीव प्रांजला सुमधुरा सुललिता च। उपन्यासोऽयम् अतीव रोचिष्णुः। शिवराजविजयमतिरिच्य पञ्चाशत् अन्यान्यपि पुस्तकानि हिन्दी-भाषया संस्कृत-भाषया चानेन प्रणीतानि।

श्री व्यासः शतावधानः आसीत्। सः संस्कृतेन पद्यानि अपि प्रणीतवान्। श्री भारतेन्दुना अपि तस्य कविताः प्रशंसिताः। एकया घटिकया शतं श्लोकान् स प्रणयति स्म। शास्त्रार्थाः अपि तस्मै रोचन्ते स्म। सर्वदा सर्वत्रैव शास्त्रार्थेषु तस्य विजयोऽभवत्। आर्थिकाः अन्तरायाः तेन प्रतिपदम् अनुभूताः।

देशस्य अनेकाभिः सभाभिः अनेकैः पदैः पदकैः च स सम्मानितोऽभवत्।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| पुरन्दरः | = | इन्द्र, राजा | (king) |
| गद्यम् | = | गद्य | (prose) |
| निकषः | = | कसौटी | (testing stone) |
| साहित्यिक | = | साहित्यिक | (connected with literature) |
| मण्डलम् | = | समुदाय, समूह | (circle) |
| पद्यम् | = | पद्य | (verse) |
| रचना | = | रचना | (creation, work) |
| विश्रुत | = | प्रसिद्ध | (well-known) |
| समकालिक | = | समकालीन | (contemporary) |
| उपन्यासः | = | उपन्यास | (a novel) |
| शैली | = | शैली | (style) |
| इदम् | = | यह | (this) |
| निःश्वासः | = | अध्याय | (chapter) |
| प्रांजल | = | स्पष्ट | (lucid) |
| सुललित | = | अति रुचिकर | (very interesting) |
| सम्मानित | = | प्रतिष्ठित | (respected) |
| रोचिष्णु | = | मनोहर | (charming) |
| अति + रिच् | = | पीछे छोड़ना, के अलावा | (to leave behind, in addition to) |
| प्र + नी | = | रचना करना | (to compose) |
| शतावधान | = | अनेक बातों का एक साथ ध्यान करने वाला | (one who attends to many things at a time) |
| प्र + शंस् | = | प्रशंसा करना | (to praise) |
| घटिका | = | 24 मिनट | (24 minutes) |
| श्लोकः | = | संस्कृत-पद्य | (Sanskrit verse) |
| शास्त्रार्थः | = | शास्त्रीय विवाद | (scriptural discussion) |
| रुच् | = | अच्छा लगना | (to be pleasing) |
| विजयः | = | जीत | (victory) |
| आर्थिक | = | धन-सम्बन्धी | (financial) |
| अन्तरायः | = | कठिनाई | (difficulty) |

| | | | |
|---|---|---|---|
| प्रतिपदम् | = | हर कदम पर | (at every step) |
| सभा | = | सभा | (society) |
| पदम् | = | दर्जा, पद | (rank) |
| पदकम् | = | तमग़ा, पदक | (medal) |

नया रूप (New Pronoun)—इदम् (पृष्ठ 89)

नया धातु (New Root)—रुच् A

नए उपसर्ग-युक्त धातु (New Prefixed Root)

अति + रिच् A, प्र + नी, प्र + शंस्

नए विशेषण (New Adjectives)

| | | |
|---|---|---|
| साहित्यिक | साहित्यिकी | साहित्यिकम् |
| विश्रुत: | विश्रुता | विश्रुतम् |
| समकालिक: | समकालिकी | समकालिकम् |
| प्रांजल: | प्रांजला | प्रांजलम् |
| सुमधुर: | सुमधुरा | सुमधुरम् |
| सुललित: | सुललिता | सुललितम् |
| सम्मानित: | सम्मानिता | सम्मानितम् |
| रोचिष्णु: | रोचिष्णु: | रोचिष्णु |
| शतावधान: | शतावधाना | शतावधानम् |
| आर्थिक: | आर्थिकी | आर्थिकम् |

नया अव्यय (New Indeclinable)—प्रतिपदम्

उपपद विभक्ति:

'रुच्' धातु के योग में जिसे रुचिकर हो उसके वाचक शब्द में चतुर्थी विभक्ति (The word for the person who likes gets the fourth vibhakti when the root रुच् is used).

नया मुहावरा (New Idiom)—पण्डित - पुरन्दर:

## अभ्यास:

पाठगतम्—

1. श्री व्यास के व्यक्तित्व की प्रमुख विशेषताएँ बताइए (Tell main points of Vyasa's personality).

**भाषा व्याकरणं च–**

2. 'क्तवतु' के स्थान पर 'क्त' का प्रयोग कीजिए और वाक्यों में अन्य आवश्यक परिवर्तन कीजिए (Replace क्तवतु with क्त and make necessary changes in sentences) नृपः वनं गतवान् । ते चलितवन्तः । नृपः शुकं पृष्टवान् । मुनयः माम् आनीतवन्तः । कविः कवितां प्रणीतवान् ।

3. 'इदम्' के विभिन्न रूपों से रिक्त स्थानों की पूर्ति कीजिए (Fill in the blanks with इदम् forms)

| | | |
|---|---|---|
| ......... वनानि । | ......... ग्रन्थेभ्यः | ......... राज्ये । |
| ......... परीक्षा । | ......... फले । | ......... धर्मः । |
| ......... जनेषु । | ......... गतिः । | ......... दिवसानाम् । |

**संस्कृत-लेखनम्–**

4. उत्तर दीजिए (Answer)—
   (क) शिवराजविजयस्य रचयिता कः आसीत् ?
   (ख) शिवराजविजयस्य भाषा कीदृशी अस्ति ?

5. अनुवाद कीजिए (Translate)
   (क) उनके द्वारा क्या किया गया ? (What was done by them ?)
   (ख) इसके अलावा पचास और पुस्तकें उनके द्वारा लिखी गईं । (Besides this, another fifty books were written by him.)
   (ग) इस उपन्यास की भाषा मधुर है । (The language of this novel is lucid.)
   (घ) उन्होंने अनेक पदक प्राप्त किए । (He received many medals.)

□□



*Teaching Point:*
तव्य

सप्तमः पाठः

# पत्रम् मित्रं प्रति

चिरम् सम् + पद् वृत्तान्तः ग्रह वस्तुतः अभियन्ता
अनुसन्धानम् वृत्तिः तावत् यावत् पुरातन
अपि च गृध् महत्त्वाकांक्षा व्यवस्थित मनीषा
मन् नि + वेदय्

सी-3/26, रोहतक-मार्गात्,
नवदिल्लीतः
29-8-2002

प्रिय मित्र संदीप,

अत्र कुशलं, तत्रास्तु । प्राप्तं ते पत्रम् । चिरमुत्सुकः आसम् ते पत्रमधिगन्तुम् । ज्ञातः च सर्वः वृत्तान्तः । मासेनैव परीक्षा सम्पत्स्यते । अस्याः परीक्षायाः अनन्तरं नवम्यां कक्षायां के विषयाः अस्माभिः ग्रहीतव्याः इति त्वया अहं पृष्टः । अस्मिन् विषये मया बहु विचारितम् । अत्रास्ति च मे सम्मतिः –

वस्तुतः ये अपि विषयाः अस्मभ्यं रोचन्ते ते एव अस्माभिः पठितव्याः । तेषु एव कृत-परिश्रमाः छात्राः प्रसीदन्ति सफलतां चाधिगच्छन्ति । प्रायेण तु मेधाविनः छात्राः चिकित्सकाः अभियन्तारः वा भवितुं चिन्तयन्ति । नास्ति तत्र काचित् अपि हानिः । परं चिन्तयामि यत् कथं न मया भौतिक-शास्त्रं पठित्वा तस्मिन् एव विषये अनुसन्धानं कर्तव्यम् ? अस्यां वृत्त्यां नास्ति बहु धनं, नास्ति बहु सुखं च । परं किम् एतत् धनादिकमेव जीवनस्य सर्वस्वम् ?

किं त्वमपि न चिन्तयसि यत् विज्ञान-क्षेत्रे अस्माकं देशे न तावती उन्नतिः दृश्यते यावती वर्तते अन्येषु देशेषु । अतः कथं न बहुभिः जनैः विज्ञानं पठित्वा अत्रापि किञ्चित् कर्तव्यम् ? अतः देशस्य आवश्यकतां दृष्ट्वा वयमपि जीवने वैज्ञानिकाः भूत्वा देशम् उन्नयेम ।

विज्ञान-विषयेण सह अस्माभिः संस्कृतमपि पठितव्यम् । संस्कृतस्य पुरातनं सुललितं साहित्यं पठित्वा वैदेशिकाः अपि चमत्कृताः अभवन्, तत् च अस्माभिः अपि पठितव्यम् । अपि च, संस्कृते अस्ति पुरातनं विज्ञान-साहित्यमपि । तत् पठितुं संस्कृतस्य विज्ञानस्य च द्वयोः एव ज्ञानम् आवश्यकम् ।

किं बहुना ! न वयं गृध्याम अर्थेषु । नास्ति मे महत्त्वाकांक्षा धनमूला । देशस्य आवश्यकता एव मे आवश्यकता । एषा मम व्यवस्थिता मनीषा । मन्ये यत् तव सम्मतिः अपि अत्र भविष्यतीति ।

गुरुभ्यः मे प्रणामं निवेदय ।

अभिन्नः ते–
शचीन्द्रः

## शब्दार्थाः

| | | | |
|---|---|---|---|
| चिरम् | = | बहुत देर से | (for a long time) |
| उत्सुक | = | उत्सुक | (eager) |
| सम + पद् | = | सम्पन्न होना | (to be accomplished) |
| वृत्तान्तः | = | हालचाल | (state of being) |
| नवम | = | नवाँ | (ninth) |
| ग्रह् | = | ग्रहण करना | (to take) |
| वस्तुतः | = | वास्तव में | (in fact) |
| कृत-परिश्रम | = | जिसने परिश्रम किया है | (one who has put in hardwork) |
| सफलता | = | सफलता | (success) |
| मेधाविन् | = | बुद्धिमान् | (intelligent) |
| चिकित्सकः | = | डाक्टर | (doctor) |
| अभियन्तृ | = | इंजीनियर | (engineer) |
| हानिः | = | हानि | (harm) |
| भौतिक-शास्त्रम् | = | भौतिकी | (physics) |
| अनुसन्धानम् | = | शोध-कार्य | (research) |
| वृत्तिः | = | पेशा | (profession) |
| आदिक | = | आदि | (etc.) |
| तावत् | = | उतना | (that much) |
| यावत् | = | जितना | (as much) |
| पुरातन | = | पुराना | (ancient) |
| वैदेशिक | = | विदेशी | (foreigner) |
| चमत्कृत | = | विस्मयपूर्वक चकित | (charmed) |
| अपि च | = | और | (moreover) |

| | | | |
|---|---|---|---|
| गृध् | = | लालच करना | (to be greedy) |
| महत्त्वाकाक्षा | = | पदेच्छा | (ambition) |
| धनमूल | = | जिसकी जड़ में धन है | (one having money at the root) |
| व्यवस्थित | = | निश्चित | (determined) |
| मनीषा | = | इच्छा | (desire) |
| मन् | = | मानना | (to believe) |
| गुरु | = | बड़े | (elder) |
| प्रणामः | = | नमस्कार | (regards) |
| नि + वेदय् | = | निवेदन करना | (to offer) |
| अभिन्न | = | अभिन्न | (inseparable) |

**नये धातु** (New Roots) – ग्रह, गृध, मन् A

**उपसर्ग-युक्त धातु** (New Prefixed Roots) – सम् + पद् A, नि + विदेय्

**नये विशेषण** (New Adjectives) –

| | | |
|---|---|---|
| उत्सुकः | उत्सुका | उत्सुकम् |
| नवमः | नवमी | नवमम् |
| कृतपरिश्रमः | कृतपरिश्रमा | कृतपरिश्रमम् |
| मेधावी | मेधाविनी | मेधावि |
| आदिक | आदिका | आदिकम् |
| तावान् | तावती | तावत् |
| यावान् | यावती | यावत् |
| पुरातनः | पुरातनी | पुरातनम् |
| वैदेशिकः | वैदेशिकी | वैदेशिकम् |
| चमत्कृतः | चमत्कृता | चमत्कृतम् |
| धनमूलः | धनमूला | धनमूलम् |
| व्यवस्थितः | व्यवस्थिता | व्यवस्थितम् |
| अभिन्नः | अभिन्ना | अभिन्नम् |

**नये अव्यय** (New Indeclinables) —चिरम्, वस्तुतः

**कारक-विभक्ति :**

जब **समय एवं दूरी सूचक शब्दों** द्वारा कार्य की पूर्णता प्रकट हो, तो समय-दूरी-सूचक शब्दों में **तृतीया** विभक्ति लगती है (Words denoting time or distance gets the third vibhakti if the completion of work is implied).

**विशेष :**

आदिक और इसके पर्यायवाची शब्द **विशेषण के रूप में** प्रयुक्त होते हैं (आदिक or its synonyms behave like adjectives)—

रामकृष्णादिकेष पुरुषेषु । सीतासावित्र्यादिकासु नारीषु

## अभ्यासः

**पाठगतम्–**

1. आपके जीवन की महत्त्वाकांक्षा क्या है ? संक्षेप में लिखिए (What is the ambition of your life? Write in brief.)

**भाषा व्याकरणं च–**

2. 'तव्य' के रूपों से स्थान पूर्ति कीजिए (Fill in the blanks with तव्य forms)—

बालैः ग्रन्थाः ........ । बालाभिः मातृभूमिः ........

त्वया बहिः न ........ । छात्रैः संस्कृतम् ........ ।

गुरुभ्यः प्रणामः ........ । अस्माभिः किं ........ ?

3. निर्दिष्ट रूप दीजिए (Give the required forms)—

कृ + तव्य, पठ् + क्त, पी + क्तवतु, श्रु + कृत्वा, ग्रह् + तव्य, दृश् + क्त

**संस्कृत-लेखनम्–**

4. अनुवाद कजिए–

(क) क्या हालचाल है ? (How are you ?)

(ख) क्या डाक्टरों को भी ग्रन्थ पढ़ने चाहिएँ ? (Should doctors also read books ?)

(ग) हमें देश को प्रणाम करना चाहिए । (We should salute our country.)

(घ) हमें गुरुओं के साथ नम्रतापूर्वक बोलना चाहिए । (We should talk teachers to our politely.)

□□



*Teaching Point:*
गो– declension

अष्टमः पाठः

# यशोलिप्सुः कर्णः

यशोलिप्सु अभेद्य कवचम् कुण्डलम् लभ्
याच् नमस् + कृ तिरस् + कृ गो सहस्रम्
मुहूर्तकम् क्षीरम् वाजिन् आ + रुह वारण वृन्दम्
कनकम् शिरस् अविधा नि + कृत्



(देवाः आसन् पाण्डवानां सहायकाः । इन्द्रः कर्णस्य अभेद्यं कवचं कुण्डले च लब्धुमिच्छति । तदर्थमेव ब्राह्मणस्य रूपे सः कर्णमुपगच्छति)

**ब्राह्मणः** भोः कर्ण ! महत्तरां भिक्षां त्वां याचे ।

**कर्णः** दृढं प्रसन्नः अहम् । कर्णोऽहम् । भवन्तं नमस्करोमि ।

**ब्राह्मणः** (आत्मगतम्) किं मया वदितव्यम् ? यदि दीर्घायुः भव इति वदामि तदा दीर्घायुः भविष्यति । यदि न वदामि तदा मूढोऽयम् इति मां तिरस्करिष्यति । भवतु, दृष्टम् । (प्रकाशम्) भोः कर्ण ! सूर्यः इव चन्द्रः इव हिमवान् इव सागरः इव तिष्ठतु ते यशः ।

**कर्णः** किं न वदितव्यं दीर्घायुः भवेति ? अथवा एतत् एव शोभनम् । भगवन् ! किमिच्छसि ? किमहं यच्छानि ?

**ब्राह्मणः** महत्तरां भिक्षां याचे ।

कर्णः महत्तरां भिक्षां भवते दास्यामि । गवां सहस्रं यच्छामि ।
ब्राह्मणः गावः इति ? मुहूर्तकं क्षीरं पिबामि । नेच्छामि कर्ण ! नेच्छामि ।
कर्णः किं नेच्छति भवान् । इदमपि आकर्णयतु । वाजिनां सहस्रं ते यच्छामि !
ब्राह्मणः अश्व इति ? मुहूर्तकमारोहामि । नेच्छामि कर्ण ! नेच्छामि !
कर्णः किं नेच्छति भवान् । वारणानां वृन्दमेतत् ते यच्छामि ।
ब्राह्मणः गज इति ? मुहूर्तकमारोहामि । नेच्छामि कर्ण ! नेच्छामि !
कर्णः किं नेच्छति भवान् । अपर्याप्तं कनकं यच्छामि ।
ब्राह्मणः सुवर्णं गृहीत्वा गच्छामि । (किंचित् गत्वा) तेन किम् ? नेच्छामि कर्ण ! नेच्छामि !
कर्णः तदा जित्वा पृथ्वीं दास्यामि ।
ब्राह्मणः पृथिव्याः किं करिष्यामि ? ब्राह्मणोऽहम् !
कर्णः तेन हि मम शिरः यच्छामि ।
ब्राह्मणः अविधा ! अविधा !
कर्णः अलं भयेन । प्रसीदतु भवान् । इदं कवचं कुण्डले च दातुमिच्छामि ।
ब्राह्मणः यच्छतु यच्छतु !
कर्णः (आत्मगतम्) एष एवास्य कामः । किं नु कृष्णस्य एष उपायः । सोऽपि भवतु !

(निकृत्य यच्छति)

– भासकृत-कर्णभारात्

## शब्दार्थाः

| | | | |
|---|---|---|---|
| यशोलिप्सु | = | यशलोभी | (fame-greedy) |
| अभेद्य | = | अटूट | (unbreakable) |
| कवचम् | = | रक्षाकवच | (armour) |
| कुण्डलम् | = | कान का आभूषण | (ear-ring) |
| लभ् | = | पाना | (to get) |
| रूपम् | = | शक्ल | (form) |
| भिक्षा | = | भीख | (alms) |
| याच् | = | माँगना | (to beg) |
| दृढम् | = | अत्यधिक | (very much) |
| नमस् + कृ | = | नमस्कार करना | (to salute) |
| आत्मगतम् | = | अपने-आपको | (to oneself) |
| दीर्घायु | = | लम्बी उम्र वाला | (one with long life) |
| मूढ | = | मूर्ख | (foolish) |
| तिरस् + कृ | = | तिरस्कार करना | (to insult) |
| भवतु | = | अच्छा ! | (well !) |

| | | | |
|---|---|---|---|
| प्रकाशम् | = | स्पष्ट | (openly) |
| हिमवत् | = | हिमालय | (Himalaya) |
| सागरः | = | समुद्र | (ocean) |
| शोभन | = | सुन्दर, ठीक | (alright) |
| गो | = | गाय | (cow) |
| सहस्रम् | = | हज़ार | (thousand) |
| मुहूर्तकम् | = | क्षण-भर | (for-a-while) |
| क्षीरम् | = | दूध | (milk) |
| वाजिन् | = | घोड़ा | (horse) |
| आ + रुह् | = | चढ़ना | (to ride) |
| वारण | = | हाथी | (elephant) |
| वृन्दम् | = | झुण्ड | (multitude, herd) |
| अपर्याप्त | = | बहुत अधिक | (a lot of) |
| कनकम् | = | सोना | (gold) |
| सुवर्णम् | = | सोना | (gold) |
| पृथ्वी | = | पृथ्वी | (the earth) |
| शिरस् | = | सिर | (head) |
| अविधा | = | बचाओ, बचाओ | (help! help !) |
| सहर्षम् | = | ख़ुशी के साथ | (happily) |
| कामः | = | इच्छा | (desire) |
| नु | = | (संदेह-प्रश्न-वाचक अव्यय) | (*particle denoting doubt & question*) |
| नि + कृत् | = | काटना | (to cut) |

**नया रूप** (New Noun)—गो (पृष्ठ 87)

**नए धातु** (New roots)—लभ् A, याच् A

**नए उपसर्ग युक्त धातु** (New Prefixed Roots)—नमस् + कृ, तिरस् + कृ, आ + रुह्, नि + कृत्

**नए विशेषण** (New Adjectives)

| | | |
|---|---|---|
| लिप्सुः | लिप्सुः | लिप्सु |
| अभेद्यः | अभेद्या | अभेद्यम् |
| दृढः | दृढा | दृढम् |
| दीर्घायुः | दीर्घायुः | दीर्घायु |
| मूढः | मूढा | मूढम् |

| | | |
|---|---|---|
| शोभनः | शोभना | शोभनम् |
| अपर्याप्तः | अपर्याप्ता | अपर्याप्तम् |

**नए अव्यय** (New Indeclinables)—

दृढम्, भवतु, प्रकाशम्, मुहूर्तकम्, अविधा, नु

**कारक विभक्ति :**

'याच्' धातु द्विकर्मक है । जिससे माँगा जाए और जो कुछ माँगा जाए, दोनों के वाचक शब्द द्वितीया विभक्ति में (याच् admits two objects. The words for the person asked of, and the thing asked for take the second vibhakti).

**विशेष :**

संख्या कहने के दो ढंग (Two ways for expressing numbers)– **गवां सहस्रम्, सहस्रम् गावः**

## अभ्यासः

**पाठगतम्**

1. कर्ण ने निजी यश की रक्षा के लिए अपने दल की परवाह न की । क्या आप इससे सहमत हैं ? युक्तिसंगत उत्तर दीजिए (Karna protected his own glory but did not care for the group he belonged to. How far do you agree with his action? Support your answer with arguments).

**भाषा व्याकरणं च**

2. 'गो' शब्द के रूप लिखिए (Decline गो)—

| | | | |
|---|---|---|---|
| प्रथमा | ............ | ............ | ............ |
| द्वितीया | ............ | ............ | ............ |
| चतुर्थी | ............ | ............ | ............ |
| षष्ठी | ............ | ............ | ............ |
| सप्तमी | ............ | ............ | ............ |

**संस्कृत-लेखनम्** (Translate)—

3. अनुवाद कीजिए -
   (क) कर्ण हज़ार गाएँ देना चाहता था । (Karna wanted to give a thousand cows).
   (ख) गुरुओं से विद्या माँगो । (Ask for knowledge from teachers).
   (ग) जो कीर्ति माँगता है वह नहीं पाता । (One who asks for glory does not get it).
   (घ) गौओं के साथ किसे जाना चाहिए ? (Who should go with the cows?)
   (ङ) अच्छा, थोड़ी देर तो ठहरो । (Okay, wait a minute.)

□□

*Teaching Point :*
आत्मनेपद–लङ्

नवमः पाठः

# स्वतन्त्रता-संग्रामः (क)

आयत्त यत युध् भेदनीतिः अव + लम्ब्
योजक अनुशासन-सूत्रम् समाज-सेवकः धर्म-प्रवर्तकः
शिक्षा-शास्त्री महत्त्वम् भावना

**पुरा भारतीयेषु एकतायाः अभावः आसीत् । एतत् दृष्ट्वा अनेके वैदेशिकाः अत्रागच्छन् अस्मान् चाजयन् । अनन्तरम् आंग्लीयाः अत्रागच्छन् । भारतम् आयत्तं कर्तुं षष्टि वर्षाणि ते अयतन्त । अस्मिन् काले महाराष्ट्रस्य पेशवा-नाना-साहबः (द्वितीयः), मैसूरस्य टीपू सुल्तानः, इन्दौरस्य च यशवन्तरावहोल्करःआंग्लीयैः सह प्रतिपदम् अयुध्यन्त । परम् आंग्लीयाः चतुराः आसन् । ते भेदनीतिम् अवलम्ब्य क्रमेण सर्वमेव भारतम् आयत्तमकुर्वन् ।**



**1857-तमे वर्षे भारतस्य प्रथमः स्वतन्त्रता-संग्रामः अभवत्। अस्मिन् संग्रामे अनेके वीराः आसन्, यथा–मंगल पांडे, धुन्धुपन्त, नाना साहब पेशवा, बहादुरशाह जफरः, झाँसी-रानी लक्ष्मीबाई, ताँत्या टोपे, कुँवरसिंहः चेत्यादयः । परम् एतेषां सर्वेषां वीराणां योजकं किमपि अनुशासन-सूत्रं नासीत् । अस्मात् एव कारणात् काऽपि योजना सफला नाभवत् ।**



**तदनु राजाराममोहनरायः, परमहंसः रामकृष्ण-देवः, अरविन्दघोषः, स्वामिदयानन्दः, सर सैयद अहमद खाँ अन्ये चापि केचित् समाज-सेवकाः, धर्म-प्रवर्तकाः शिक्षा-शास्त्रिणः च स्वतन्त्रतायाः विचारान् महत्त्वं च सर्वत्र प्रासारयन् । एतेषां प्रयत्नैः स्वतन्त्रतायाः भावना सर्वत्र प्रसृतवती ।**

**1885-तमे वर्षे अखिल राष्ट्रिय-महासभा (इण्डियन नेशनल कांग्रेस) अस्थाप्यत । दादा भाई नौरोजी, गोपालकृष्ण गोखले, लोकमान्यः तिलकः, लाला लाजपतरायः,विपिनचन्द्रपालः अन्ये च केचन नेतारः स्वातन्त्र्य-शिखां सर्वत्र प्राज्वालयन् ।**



## शब्दार्थाः

| | | | |
|---|---|---|---|
| एकता | = | संगठन | (unity) |
| अभावः | = | कमी | (dearth, shortage) |
| आयत्त | = | अधीन | (subservient, slave) |
| यत् | = | कोशिश करना | (to try) |
| युध् | = | युद्ध करना | (to fight) |
| भेदनीतिः | = | फूट की नीति | (policy of dividing) |
| अव + लम्ब् | = | सहारा लेना | (to cling, to support oneself on) |
| स्वतन्त्रता | = | आज़ादी | (freedom) |
| संग्रामः | = | युद्ध | (war) |
| आदि | = | आदि | (etc.) |
| योजक | = | मिलाने वाला | (joining) |
| अनुशासन-सूत्रम् | = | अनुशासन-रूपी धागा | (thread of discipline) |
| योजना | = | योजना | (plan) |
| समाज-सेवक | = | समाज-सेवक | (social worker) |
| धर्म-प्रवर्त्तक | = | धर्म का आरम्भकर्त्ता | (founder of a religious sect) |
| शिक्षा-शास्त्रिन् | = | शिक्षा-शास्त्री | (educationist) |
| महत्त्वम् | = | महत्त्व | (importance) |
| भावना | = | भावना | (feeling) |
| शिखा | = | ज्वाला | (flame) |
| प्र + ज्वालय् | = | जलाना | (to kindle) |

नए धातु (New Roots)—यत् A, युध् A

नए उपसर्गयुक्त धातु (New Prefixed, Roots) — अव+लम्ब् A, प्र+ज्वालय्

**नए विशेषण** (New Adjectives)—

| | | |
|---|---|---|
| आयत्तः | आयत्ता | आयत्तम् |
| योजकः | योजिका | योजकम् |
| सेवकः | सेविका | सेवकम् |
| प्रवर्त्तकः | प्रवर्त्तिका | प्रवर्त्तकम् |

**विशेषः**

संख्यावाचक विशेषण अपने विशेष्य की **विभक्ति** और **लिंग** का अनुसरण करते हैं (Numerative adjectives get the vibhakti and the gender of the nouns they wualify.)

## अभ्यासः

**पाठगतम्**

1. हम पराधीन क्यों हुए थे ? क्या वे अवगुण अब भी हम में हैं या नहीं ? युक्तिसंगत उत्तर दीजिए (Why were we ruled by others ? Do we still have those weaknesses ? Support your answer with arguments).
2. हमें आज़ादी पाने के लिए क्या कीमत देनी पड़ी—इस विषय पर एक लघु निबन्ध लिखिए (What price did we pay for getting our freedom. ? Write a short essay on this topic).

**भाषा व्याकरणं च**

3. 'यत्' और 'युध्' के लङ् लकार में रूप लिखिए (Conjugate यत् and युध् in लङ्)
4. प्रत्येक शब्द से एक वाक्य बनाइए (Make a sentence from each of the following)—

   अव+लम्ब्, तिरस्+कृ, प्रमाणी+कृ, अनु+सृ

**संस्कृत-लेखनम्**

5. उत्तर दीजिए (Answer)—
   (क) वैदेशिकाः कया नीत्या अस्माकं देशमजयन् ?
   (ख) स्वतन्त्रतायै अस्माकं प्रयत्नाः किमर्थ सफलाः न भूतवन्तः ?
   (ग) स्वतन्त्रतायाः भावना सर्वत्र कथं प्रसृतवती ?
   (घ) राष्ट्रिय-महासभायाः स्थापना कदा भूतवती ?

□□

*Teaching Point :*
आत्मनेपद—लङ् contd.

दशमः पाठः

# स्वतन्त्रता-संग्रामः (ख)

| | | | | |
|---|---|---|---|---|
| काण्डम् | घट् | सूत्रधारः | प्रबुद्ध | लग् |
| क्रान्तिकारिन् | महाभागः | साचिव्यम् | निर्माणम् | बलिः |



1919-तमे वर्षे 'जलियां-वाला-बाग' काण्डम् अघटत । तत्र सहस्राणि जनाः आंग्लीय-सैनिकैः मृत्युं प्रापिताः । एतेन काण्डेन सर्वं भारतमकम्पत ।

1920-तमे वर्षे मोहनदास-कर्मचन्द-गान्धी स्वतन्त्रता-संग्रामस्य सूत्रधारोऽभवत् । तस्य असहयोगान्दोलनेन सर्वमेव भारतं प्रबुद्धमभवत् । श्री-गान्धिना सह पंडित जवाहरलाल-नेहरूः, सरदार-वल्लभभाई-पटेलः, डा० राजेन्द्रप्रसादः अन्ये च नेतारः सर्वाणि सुखानि त्यक्त्वा देश-कार्ये लग्नाः ।

चन्द्रशेखर आजादः, भगतसिंहः, रामप्रसाद-बिस्मिलः, लाला हरदयालः, खुदीराम-बोसः,



विनायकः दामोदर-सावरकरः अन्य चानेके क्रान्तिकारिणः स्वं जीवनं दत्वा स्वतन्त्रता-दीपम् अज्वालयन् । सुभाषचन्द्र वसुः महाभागः जापान-वासिनां साचिव्येन बर्मा-प्रदेशे भारतस्य राष्ट्रिय-सेनायाः निर्माणमकरोत् ।

एतत् सर्वं विरोधं दृष्ट्वा सहस्रैः बलिभिः च तृप्ताः भूत्वा आंग्लीयाः 1947-तमे वर्षे अगस्तमासस्य पञ्चदशे दिवसे भारतं त्यक्त्वा स्वदेशं गतवन्तः । वयं च इत्थं स्वतंत्रताम् अलभामहि ।

एषा अस्ति कथा भारतीयस्य स्वतंत्रता-संग्रामस्य ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| काण्डम् | = | काण्ड | (mishap) |
| घट् | = | घटित होना | (to happen) |
| सूत्रधारः | = | नेता | (leader) |
| असहयोगान्दोलनम् | = | असहयोग आन्दोलन | (non-cooperation movement) |
| प्रबुद्ध | = | जागृत | (awakened) |
| लग् | = | लग जाना | (to attach oneself to) |
| क्रान्तिकारिन् | = | क्रान्तिकारी | (revolutionary) |
| दीपः | = | दीप | (lamp) |
| महाभागः | = | महोदय, भाग्यशाली | (great, fortunate) |
| वासिन् | = | निवासी | (inhabitant) |
| साचिव्यम् | = | सहायता | (help) |
| निर्माणम् | = | निर्माण | (making) |
| बलिः | = | बलिदान | (sacrifice) |

नए धातु (New Roots) —घट् A, लग्

नए विशेषण (New Adjectives)—

| | | |
|---|---|---|
| प्रबुद्धः | प्रबुद्धा | प्रबुद्धम् |
| —कारी | —कारिणी | —कारि |
| महाभाग | महाभागा | महाभागम् |
| वासी | वासिनी | वासि |

विशेषः

प्रस्तुत पाठ में संख्यावाचक विशेषण 'सहस्र' शब्द का बहुवचन में प्रयोग है । इसका कारण यह हैं कि यह निश्चित संख्या का ज्ञापक नहीं है, बल्कि 'हजारों' इस भाव का परिचायक है (In this lesson,

the numerative adjective सहस्र is used in plural, the reason being that it denotes an indefinite number — 'thousands of').

## अभ्यासः

पाठगतम्–

1. गांधी जी के असहयोग आन्दोलन के बारे में आप क्या जानते हैं ? संक्षेप में लिखिए (What do you know about Gandhi's non-cooperation movement. Write briefly.)
2. क्रान्तिकारियों का जीवन किस प्रकार का था ? देश के लिए मरने की तड़प उनके दिल में क्यों थी ? (How was the life of the revolutionaries ? Why did they have such a burning desire to die for their country ?)

भाषा व्याकरणं च–

3. यथानिर्दिष्ट रूप लिखिए (Give forms as required)—

| | | | | |
|---|---|---|---|---|
| यत् | लङ् प्र० पु० | ......... | ......... | ......... |
| युध् | लङ् म० पु० | ......... | ......... | ......... |
| याच् | लङ् उ० पु० | ......... | ......... | ......... |
| सम्+पद् | लङ् म० पु० | ......... | ......... | ......... |
| अव+लम्ब् | लङ् उ० पु० | ......... | ......... | ......... |

संस्कृत-लेखनम्

4. देशस्य स्वतन्त्रता – इस विषय पर संस्कृत में दस वाक्य लिखिए (Write ten sentences in Sanskrit on this topic.)
5. अनुवाद कीजिए (Translate)—
   (क) यह स्त्री प्रयाग की रहने वाली है । (This woman is from Prayaga).
   (ख) उसके कमजोर दोस्त ने कोशिश भी नहीं की । (His weak friend did not even try).
   (ग) सेना तीन प्रकार की होती है । (Armed forces are of three types).
   (घ) इस प्रकार की सुखद माँ दुर्लभ है । (Such a comforting mother is hard to get).
   (ङ) सर्दी से सब स्त्रियाँ काँपी । (All the women shivered with cold).

□□

*Teaching Point :*
(i) अः + घोष
↓
ओ

एकादशः पाठः

# सुपद्यानि

मृ (म्रियू) अभिषेकः मृगेन्द्रता विद् भारती वित्तम्
श्रुतवान् आ+श्रि(श्रय्) निरामय भद्रम् कम्(कामय्)
अपुनर्भवः आर्तिः शुभ्(शोभ्) बकः

## स्वाभिमान-प्रशंसा

एकः एव खगो मानी,
चिरं जीवतु चातकः ।
म्रियते वा पिपासायां,
याचते वा पुरंदरम् ।।





## पराक्रम-प्रशंसा

नाभिषेको न संस्कारः सिंहस्य क्रियते वने ।
विक्रमार्जित-राज्यस्य स्वयमेव मृगेन्द्रता ।।

## विद्या प्रशंसा

अपूर्वः कोऽपि कोषोऽयं विद्यते तव भारति ।
व्ययतो वृद्धिमायाति क्षयमायाति संचयात् ।।



## धनं प्रति व्यंग्यम्

यस्यास्ति वित्तं स नरः कुलीनः,
स पण्डितः स श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः,
सर्वे गुणाः काञ्चनमाश्रयन्ति ।।

## प्राणि-सेवा-समीहा

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःख-भाक् भवेत् ।।
न त्वहं कामये राज्यं न स्वर्गं नापुनर्भवम् ।
कामये दुःख-तप्ताना प्राणिनामार्ति-नाशनम् ।।

## भूषणं किम्?

हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम् ।
श्रोत्रस्य भूषणं शास्त्रम् भूषणैः किं प्रयोजनम् ?

## शिक्षा-महत्तवम्

माता शत्रुः पिता वैरी येन बालो न पाठितः ।
न शोभते सभा-मध्ये हंस-मध्ये बको यथा ।

### शब्दार्थाः

| | | | |
|---|---|---|---|
| स्वाभिमानम् | = | स्वाभिमान | (self-respect) |
| प्रशंसा | = | प्रशंसा | (praise) |
| मानिन् | = | स्वाभिमानी | (one having self-respect) |
| चातक | = | पपीहा | (papiha—*name of a particular bird*) |
| मृ (म्रिय्) | = | मरना | (to die) |
| पिपासा | = | प्यास | (thirst) |
| पराक्रमः | = | ताक़त | (valour, strength) |
| अभिषेकः | = | राज्यतिलक | (coronation) |
| संस्कारः | = | औपचारिक रीति | (formal rite) |
| विक्रमः | = | ताकत | (strength) |
| मृगेन्द्रता | = | पशुराज का पद | (rank of the king of animals) |

| | | | |
|---|---|---|---|
| अपूर्व | = | अद्भुत | (unique) |
| कोषः | = | खज़ाना | (treasure). |
| विद् | = | होना | (to be) |
| भारती | = | सरस्वती | (goddess of Learning) |
| व्ययतः | = | ख़र्च करने से | (by spending) |
| आ + या | = | आना | (to come) |
| क्षयः | = | नाश | (destruction) |
| संचय | = | इकट्ठा करना | (collecting) |
| वित्तम् | = | धन | (wealth) |
| कुलीन | = | अच्छे कुल वाला | (well-born) |
| श्रुतवत् | = | ज्ञानी | (learned) |
| गुणज्ञ | = | गुणों का ज्ञाता | (knower of virtues) |
| वक्तृ | = | भाषण देने वाला | (one who gives speeches) |
| दर्शनीय | = | देखने योग्य, सुन्दर | (handsome) |
| काञ्चनम् | = | सोना | (gold) |
| आ + श्रि (श्रय्) | = | आश्रित होना | (to rest) |
| निरामय | = | नीरोग | (healthy) |
| भद्रम् | = | कल्याण | (welfare) |
| दु:खभाक् | = | दु:ख का भागी | (sharer of distress) |
| कम् (कामय्) | = | चाहना | (to want) |
| स्वर्गः | = | स्वर्ग | (heaven) |
| अपुनर्भवः | = | मोक्ष | (freedom from birth and death) |
| तप्त | = | दुःखी | (distressed) |
| प्राणिन् | = | प्राणी | (creature) |
| आर्तिः | = | दु:ख | (distress) |
| नाशनम् | = | नाश | (destruction) |
| वैरिन् | = | वैरी | (enemy) |
| शुभ् (शोभ्) | = | अच्छा लगना | (to look pleasing) |
| बकः | = | बगला | (crane) |

नए धातु (New Roots)—मृ (म्रियृ) A, विद् A, कम् (कामय्) A, शुभ् (शोभ्) A

नए उपसर्ग युक्त धातु (New Prefixed Roots) —आ + या, आ + श्रि (श्रय्)

नए विशेषण (New Adjectives)—

| | | |
|---|---|---|
| मानी | मानिनी | मानि |
| अपूर्वः | अपूर्वा | अपूर्वम् |
| कुलीनः | कुलीना | कुलीनम् |
| श्रुतवान् | श्रुतवती | श्रुतवत् |
| गुणज्ञः | गुणज्ञा | गुणज्ञम् |
| वक्ता | वक्त्री | वक्तृ |
| दर्शनीयः | दर्शनीया | दर्शनीयम् |
| निरामयः | निरामया | निरामयम् |
| —भाक् | —भाक् | —भाक् |
| वैरी | वैरिणी | वैरि |

## अभ्यासः

पाठगतम्—

1. संसार में पराक्रम की ही पूजा होती है । बड़े देश छोटे देशों को दबा लेते हैं । बड़ी मछलियाँ छोटी मछलियों को निगल जाती हैं । इस भाव का अपने शब्दों में विस्तार कीजिए (Strength is worshipped inthis world. Big countries control smaller countries. Big fish swallow smaller fish. Elaborate this idea in your own words).

2. मनुष्य की सबसे बड़ी कामना क्या हो सकती है? (What can be a human being's highest desire ?)

भाषा व्याकरणं च—

3. सन्धि या सन्धिच्छेद कीजिए (Join or disjoin)—
खगः+मानी, अभिषेकः+न, व्ययतः+वृद्धिः, बालः+न, विस्मितः+नृपः, सोऽपि, वृक्षम्+गत्वा, कार्यालयो वा

4. रिक्त स्थानों की पूर्ति कीजिए (Fill in the blanks)—
(क) याचक : ……… (धनिक) ……… (धन) याचते ।
(ख) छात्राः ……… (गुरु) ……… (कृपा) याचन्ते ।
(ग) ……… (अस्मद्) इदं यन्त्रं रोचते ।
(घ) ……… (मोहन) ……… (सोहन) च अन्तरा तस्य एकः अन्योऽपि पुत्रोऽस्ति ।
(ङ) एष ……… (स्वमित्र) अनुसरति ।

(च) ......... (नवदश) बालकानां भोजनस्य प्रबन्धोऽस्ति ।

(छ) अहम् एतान् प्रश्नान् ......... (किम्) पृच्छानि ।

**संस्कृत लेखनम्–**

5. उत्तर दीजिए (Answer)—
   - (क) कस्य कोषः अपूर्वोऽस्ति ?
   - (ख) सर्वे गुणाः कुत्र आश्रयन्ति ?
   - (ग) का स्यात् अस्माकं मनीषा ?
   - (घ) बालस्य शत्रुः कोऽस्ति ?

6. अनुवाद कीजिए (Translate)—
   - (क) कोई स्वर्ग चाहता है तो कोई मोक्ष । (Some people want heaven while others wish for liberation).
   - (ख) ज्ञान ख़र्च करने से बढ़ता है । (Knowledge increases by spending it).
   - (ग) वह भाषण देने वाली स्त्री वास्तव में दर्शनीय थी । (The worth looking at was lecturing was indeed).
   - (घ) सभा में विद्यमान मूर्ख शोभा नहीं देता । (A foolish person present in an assembly does not look good).
   - (ङ) युद्ध में सैनिक मरे । (Soldiers died in the battlefield).

□□



*Teaching Point :*
सन्धि = : + स्, त्
↓
स्

द्वादशः पाठः

# गणतन्त्र-दिवसः

गणतन्त्रम् प्रतिनिधिः प्रवर्तनम् उल्लासः
सम् + नि + पत् उत् + तुल् अभि + वादय् यावत्
आ + युज् उपकरणम् लक्षम् उभयतः
ईक्ष् मुद् (मोद्)



भारतं स्वतन्त्रो देशः अस्ति । अत्र जनतायाः प्रतिनिधयः एव राज्यं चालयन्ति । एतेषां प्रतिनिधीनां पञ्च वर्षाणि अनु जनतयैव निर्वाचनं भवति । प्रजायाः कल्याणाय प्रजयैव यत् शासनमस्ति तत् गणतन्त्रमिति अस्माकं संविधाने उल्लिखितम् ।

एतस्य संविधानस्य च प्रवर्तनं 1950-तमे वर्षे जनवरी-मासस्य षड्विंशतितमायां तारिकायामभवत् । एष एव दिवसः अनुवर्षम् गणतन्त्र-दिवसः इति स्मर्यते मान्यते च ।

एतस्मिन् दिवसे सर्वस्मिन् देशे महान् उल्लासो भवति । महान्तः च संभाराः क्रियन्ते । प्रतिनगरं जनाः संनिपतन्ति, राष्ट्रिय-ध्वजम् उत्तोलयन्ति अभिवादयन्ति च । राष्ट्रं प्रति अस्माकं भारतीयानां किं कर्त्तव्यमिति स्मरन्ति सर्वेषां प्रदेशानां राजधानीषु राजकीयस्समारोहः भवति यत्र स्वेन भाषणेन प्रदेशस्य राज्यपालस्सर्वेषां कर्त्तव्यं स्मारयति ।

भारतस्य राजधान्यां एतस्मिन् अवसरे विशेषस्समारोहो भवति । राष्ट्रपति-भवनतः रक्तदुर्गं यावत् एका शोभा-यात्रा आयोज्यते । एतस्यां शोभायात्रायां सैनिकानां प्रचलनं, तेषां युद्धोपकरणानां प्रदर्शनं च विशेषेण दर्शनीयं भवति । प्रति-प्रदेशं च एकं कौतुक-दृश्यमपि तत्र भवति । एतत् द्रष्टुं लक्षाण्येव जनाः मार्गम् उभयतः संनिपतन्ति । अन्ये च गृहे एव स्थितास्सर्वम् एतत् दूरदर्शनेनैव ईक्षन्ते मोदन्ते च ।

गणतन्त्रदिवसः अस्माकं महान् राष्ट्रियः उत्सवः ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| गणतन्त्रम् | = | प्रजातन्त्र | (republic) |
| जनता | = | जनता | (people) |
| प्रतिनिधिः | = | प्रतिनिधि | (representative) |
| शासनम् | = | शासन | (rule) |
| सविधानम् | = | संविधान | (constitution) |
| उत् + लिख् | = | वर्णन करना | (to mention) |
| प्रवर्तनम् | = | आरम्भ | (beginning) |
| तारिका | = | तारीख | (date) |
| अनुवर्षम् | = | हर वर्ष | (every year) |
| उल्लासः | = | खुशी | (happiness) |
| संभारः | = | तैयारी | (preparation) |
| सम् + नि + पत् | = | इकट्ठे होना | (to collect) |
| उत् + तुल् | = | फहराना | (to hoist) |
| अभि + वादय् | = | प्रणाम करना | (to salute) |
| राजधानी | = | राजधानी | (capital) |
| राजकीय | = | शासन का | (official) |
| समारोहः | = | समारोह | (celebration) |
| राज्यपालः | = | राज्यपाल | (governor) |
| विशेष | = | विशेष | (special) |
| रक्तदुर्गम् | = | लालकिला | (Red Fort) |
| यावत् | = | तक | (till) |
| शोभायात्रा | = | जुलूस | (procession) |
| आ+योजय् | = | आयोजन करना | (to organise) |
| प्रचनलम् | = | प्रयाण, मार्चिंग | (marching) |
| उपकरणम् | = | साधन सामग्री | (implements |

| | | |
|---|---|---|
| प्रदर्शनम् | = दिखाना | (demonstration) |
| कौतुक-दृश्यम् | = झाँकी | (pageant) |
| लक्षम् | = लाख | (hundred thousand) |
| उभयतः | = दोनों ओर | (on both sides) |
| ईक्ष् | = देखना | (to see) |
| मुद् (मोद्) | = प्रसन्न होना | (to feel happy) |

**नए धातु** (New Roots)—ईक्ष् A, मुद् (मोद्) A

**नए उपसर्ग-युक्त धातु** (New Prefixed Roots)— उत् + लिख्, सम्+नि+पत्, उत्+तुल्, अभि+वादय्, आ+योजय्

**नए विशेषण** (New Adjectives)—

| | | |
|---|---|---|
| राजकीयः | राजकीया | राजकीयम् |
| विशेषः | विशेषा | विशेषम् |

**नए अव्यय** (New Indeclinables)—

अनुवर्षम्, यावत्, उभयतः

**कारक-विभक्तिः**

'उभयतः' के योग में आए शब्द में **द्वितीया** विभक्ति (Second vibhakti is used with the word coming with उभयतः)

## अभ्यासः

**पाठगतम्—**

1. गणतन्त्र दिवस और स्वतन्त्रता दिवस में क्या अन्तर है ? स्पष्ट कीजिए (What is the difference between Republic Day and Independence Day ? Explain.)
2. हमारे देश में जनता का ही शासन है—इस कथन पर अपना मत प्रकट कीजिए (It is people's rule in our country — what is your opinion on thsi statement).

**भाषा व्याकरणं च—**

3. सन्धि कीजिए (Join)—

| | | |
|---|---|---|
| बालः+तरति, | मुनिः+तान्, | कृतः+सप्ताहे, |
| छात्रः+सः, | विशेषाः+संभाराः, | सज्जनः+स्मर्यते |

4. कर्मवाच्य का रूप दीजिए (Change into passive form)—
दृश्, लिख्, भू, मानय्, स्मृ, कृ, आ+तुल्, आ+योजय्, गण्, नी, प्र+शंस्

## संस्कृत-लेखनम्–

5. निम्न विषय पर एक छोटा-सा निबन्ध संस्कृत में लिखिए (Write a short essay in Sanskrit on the following topic)—
विद्यालये गणतन्त्र-दिवस समारोहः

6. अनुवाद कीजिए (Translate)—
(क) 15 अगस्त को हमारा स्वतन्त्रता दिवस होता है। (Fifteenth August is our Independence Day.)
(ख) विवाह की तैयारियाँ हो रही हैं। (Wedding preparations are going on.)
(ग) आओ, झंडा फहराएँ। (Come on, let us raise the flag.)
(घ) हमारे विद्यालय के दोनों ओर डाक्टर और इन्जीनियर रहते हैं। (On both sides of our school, doctors and engineers live.)
(ङ) इस प्रकार के राजकीय कार्य में कौन बाधा डाल सकता है? (Who can cause obstruction in such a work of the government?)

□□



Teaching Point : सन्धि–पदान्त ए + अ → ऽ

त्रयोदशः पाठः

# नृत्य-कला

अतिरेक प्र+कटय् अभिव्यक्तिः आदिम
प्रस्फुटम् प्र+चल् स्तरः उद्गमः
आधारी+कृ वैशिष्ट्यम् स्थलम् अद्यत्वे
नृत्य-नाटिका बहुशः प्रियंकर

जनः स्वं हर्षातिरेकं प्रकटयितुं नृत्यति । हर्षातिरेकस्य अभिव्यक्तिः नृत्येनापि भवति । सन्ति अन्येऽपि प्रकाराः हर्षस्य अभिव्यक्तेः परं तेषु नर्तनमेव मानवस्य आदिमः प्रकारः इति प्रस्फुटम् । बालोऽपि यदा हृष्यति सः नृत्यति । उत्सवेषु जनाः नार्यः च नृत्यन्ति । कलासु नृत्यमेव आदिमेति केचित् ।

नृत्यस्य द्वौ प्रकारौ स्तः–लोकनृत्यं शास्त्रीय-नृत्यं च । प्रत्येकं प्रदेशे विविधानि लोक-नृत्यानि दृश्यन्ते, यथा पञ्चनद-प्रदेशस्य भंगड़ा इति, राजस्थानस्य घूमर इति, गुर्जर-प्रदेशस्य गरबा इति, महाराष्ट्रस्य कोली इति, हिमाचल-प्रदेशस्य पंगी इति, एवं चान्यत्र अनेकानि लोकनृत्यानि प्रचलन्ति । परं सन्ति तत्र अन्यानि नृत्यानि यानि राष्ट्रियं स्तरं प्राप्तानि, यथा–

1. भरत- नाट्यम्–तामिल-नाडु-प्रदेशस्य तैंजोर इति नाम स्थानेऽस्य उद्गमोऽभवत् । देवदासीनाम् आसीत् नृत्यमिदम् । देवालयेषु अस्य विकासोऽभवत् ।



2. कत्थकली–पुराणानां कांचित् कथामेव आधारीकृत्य मुद्रा-प्रधानम् इदं नृत्यमस्ति ।

3. कत्थक–मुग़ल-कालेऽस्य प्रसारोऽभवत् । श्री कृष्णस्यैव कथा अस्याधारः ।

4. मणिपुरी–मणिपुरमेव अस्य उद्गमस्य स्थानम् । सामूहिकं नृत्यमेव अस्य वैशिष्ट्यम् । इदमपि श्री कृष्णस्य कथामेव आधारीकरोति ।



5. ओडिसी–उड़ीसा-प्रदेशः अस्य उद्गमस्य स्थलम् । देवदासीनां नृत्यमिदं देवालयेषु एव विकसितमभवत् । अद्यत्वे नृत्य-नाटिकानां प्रसारः बहुशः दृश्यते । विश्व-विश्रुतः उदयशंकरः एवास्ति अस्य प्रकारस्य प्रवर्तकः । नृत्य-नाटिकायां काऽपि प्रियंकरा कथा नृत्येन उपस्थाप्यते ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| नृत्यम् | = | नाच | (dance) |
| कला | = | कला | (art) |
| हर्षः | = | खुशी | (happiness) |
| अतिरेकः | = | अधिकता | (excessiveness) |
| प्र + कटय् | = | प्रकट करना | (to show) |
| अभिव्यक्तिः | = | प्रकाशन | (manifestation) |
| प्रकारः | = | तरीका | (manner) |
| नर्तनम् | = | नाच | (dance) |
| आदिम् | = | पहला | (first) |
| प्रस्फुटम् | = | स्पष्ट | (obvious) |
| हृष् | = | खुश होना | (to be delighted) |
| लोकनृत्यम् | = | लोकनृत्य | (folk dance) |

| | | | |
|---|---|---|---|
| शास्त्रीय-नृत्यम् | = | शास्त्रीय-नृत्य | (classical dance) |
| पञ्चनदप्रदेशः | = | पंजाब प्रान्त | (Punjab State) |
| गुर्जर-प्रदेशः | = | गुजरात प्रान्त | (Gujarat State) |
| प्र+चल् | = | प्रचलित होना | (to be prevalent) |
| स्तरः | = | स्तर | (standard) |
| उद्गमः | = | उत्पत्ति | (birth) |
| देवदासी | = | मन्दिर की सेविका | (female attendant in service of god) |
| विकासः | = | विकास | (development) |
| आधारीकृ | = | आधार बनाना | (to make base) |
| मुद्रा-प्रधान | = | मुद्रा-प्रमुख | (prominent in expressions) |
| प्रसारः | = | प्रसार | (propagation) |
| आधारः | = | आधार | (base) |
| सामूहिक | = | सामूहिक | (collective, group) |
| वैशिष्ट्यम् | = | विशेषता | (characteristic) |
| स्थलम् | = | स्थान | (place) |
| विकसित | = | विकसित | (developed) |
| अद्यत्वे | = | आजकल | (these days) |
| नृत्य-नाटिका | = | नृत्य-नाटिका | (ballet) |
| बहुशः | = | बहुत अधिक | (very much) |
| प्रियंकर | = | अच्छा लगने वाला | (pleasing) |

**नया धातु** (New Root)—हृष्

**नए उपसर्ग युक्त धातु** (New Prefixed Roots) —प्र+कटय्, प्र+चल्, आधारी+कृ

**नए विशेषण** (New Adjectives)

| | | |
|---|---|---|
| आदिमः | आदिमा | आदिमम् |
| –प्रधानः | –प्रधाना | –प्रधानम् |
| सामूहिकः | सामूहिकी | सामूहिकम् |
| विकसितः | विकसिता | विकसितम् |
| प्रियंकरः | प्रियंकरी | प्रियंकरम् |

**नए अव्यय** (New Indeclinables)—प्रस्फुटम्, अद्यत्वे, बहुशः

## अभ्यासः

**पाठगतम्–**

1. नृत्य एक कलामय व्यायाम है–क्या आप इस कथन से सहमत हैं ? तर्क-संगत उत्तर दीजिए (Dancing is an artistic exercise. Do you agree with this statement? Support your answer with arguments.)

2. भारत में शास्त्रीय-नृत्य कौन-कौन से हैं ? उनका संक्षिप्त परिचय दीजिए (What are the classical dances in India? Give a brief description of each).

**भाषा व्याकरणं च–**

3. सन्धि कीजिए (Join)—
वृक्षे+अस्मिन्, वने+अभवत्, अन्ये+अस्य, स्थाने+अपि, काले+अस्ति, बाले+अन्यः

4. 'प्र' उपसर्ग को निम्नलिखित धातुओं के पूर्व लगाइए और अर्थ बताइए (Add प्र before the following roots and tell the meaning)—
विश्, सद्, नश्, सृ, कटय्, हृ

**संस्कृत-लेखनम्**

5. उत्तर दीजिए (Answer)—
   (क) जनस्य हर्षातिरेकस्य अभिव्यक्तिः कथं भवति ?
   (ख) कलासु का कला आदिमा कस्य चेदं मतम् ?
   (ग) पञ्चानां लोकनृत्यानाम् अभिधानानि लिखत ।
   (घ) नृत्य-नाटिकायां किं भवति ?

6. अनुवाद कीजिए (Translate)–
   (क) कला से हीन मनुष्य पशु है, ऐसा कुछ विद्वानों का मत है । (A man without art is an animal. This is the opinion of some scholars).
   (ख) श्री राम की कथा को आधार बना कर नाटक हर नगर में होता है । (A play based on the story of Lord Rama is played in every city).
   (ग) यह कला मन्दिरों से विकसित हुई । (This art was developed in temples).
   (घ) जब सैनिक प्रयाण करते हैं तो सुन्दर लगते हैं । (When soldiers march, they look beautiful).
   (ङ) हमारे द्वारा नृत्य-नाटिका देखी गई । (The ballet was seen by us.)

□□

*Teaching Point :*
आत्मनेपद—विधिलिङ्

चतुर्दशः पाठः

# पाण्डव-दूतः

आसनम् दूतः अनामय प्रभृति समयः
दुःखम् सह दायाद्यम् नामशेष समुदाचारः
जन् क्षिप् शठः पराङ्मुख सम्प्रति
माया ह्रस्व इदानीम् दीर्घ संभ्रमः



**दुर्योधनः** आः भवान् प्राप्तः । एतत् आसनम् । उपविशतु भवान् । भोः दूत ! अपि कुशलिनः सर्वे मम बान्धवाः !

**वासुदेवः** एवम् । कुशलिनः सर्वे । युष्माकम् अनामयं पृष्ट्वा युधिष्ठिर-प्रभृतयः निवेदयन्ति—समयेन वयं कालं वने अनयाम । अनेकानि दुःखानि असहामहि । अधुना दायाद्यस्य अस्माकम् अंशं प्रयच्छेति ।

**दुर्योधनः** कथं कथं दायाद्यमिति !

**वासुदेवः** नृप ! मा मा भवान् ! एवं परस्परं विरोधेन शीघ्रं कुरु-कुलं नामशेषं जायेत ।

**दुर्योधनः** भोः दूत ! न जानाति भवान् समुदाचारम् !

**वासुदेवः** भोः सुयोधन ! ननु क्षिपसि माम् । भोः शठ ! भोः नृपाः ! गच्छामः तावत् ।

**दुर्योधनः** मा अयं गच्छेत् । न जानाति दूतस्य समुदाचारम् । तं कारागारे क्षिप ।

(अनेके कौरवाः वीराः वासुदेवेन सह युध्यन्ते परं पराङ्मुखाः पतन्ति)

दुर्योधनः किं सर्वे एव असमर्थाः ? भवतु अहमेव दण्डयामि एतं दूतम् ।

वासुदेवः किं सम्प्रति सुयोधनः उत्तिष्ठति । भवतु, सुयोधनस्य सामर्थ्यं पश्यामि ।

(मायया भगवान् कृष्णः अनेकानि रूपाणि धारयति)



दुर्योधनः आः कुत्रास्ति केशवः ! अयं केशवः ! अहो ह्रस्वः अयं केशवः ! आः तिष्ठ इदानीम् ! कुत्र केशवः ! अहो दीर्घः अयं केशवः ! अयं केशवः ! तत्र केशवः ! किमिदम् ! सर्वत्र केशवाः भवन्ति । किं करिष्यामि ?

(संभ्रमेण सर्वे तिष्ठन्ति)

–भासकृत दूतवाक्यात्

## शब्दार्थाः

| | | | |
|---|---|---|---|
| आसनम् | = | आसन | (seat) |
| दूतः | = | दूत | (messenger) |
| अनामय | = | स्वास्थ्य | (health) |
| प्रभृति | = | आदि | (etc.) |
| समयः | = | समझौता | (agreement) |
| दुःखम् | = | दुःख | (trouble) |
| सह् | = | सहना | (to bear) |
| दायाद्यम् | = | पैतृक संपत्ति | (inheritance) |
| अंशः | = | हिस्सा | (share) |
| प्र+दा | = | देना | (to give) |
| नामशेष | = | समाप्त | (finished) |
| समुदाचार | = | उचित व्यवहार | (proper behaviour) |
| जन् | = | होना, पैदा होना | (to be, to be born) |
| क्षिप् | = | अपमान करना, फेंकना | (to insult, to throw) |
| शठः | = | दुष्ट | (wicked) |
| कारागारः | = | जेल | (jail) |
| पराङ्मुख | = | पछाड़ खाया | (one with face turned away) |

| | | | |
|---|---|---|---|
| असमर्थ | = | असमर्थ | (incapable) |
| सम्प्रति | = | अब | (now) |
| सामर्थ्यम् | = | ताकत | (strength) |
| माया | = | माया (अवास्तविक आभास) | (illusion-power) |
| अहो | = | अरे ! | (ah!) |
| ह्रस्व | = | छोटा | (small) |
| इदानीम् | = | अब | (now) |
| दीर्घ | = | बड़ा | (big) |
| संभ्रमः | = | घबराहट | (nervousness) |

**नए धातु** (New Roots) – सह् A, जन् A

**नया उपसर्गयुक्त धातु** (New Prefixed Root) – प्र+दा

**नए विशेषण** (New Adjectives)

| | | |
|---|---|---|
| नामशेषः | नामशेषा | नामशेषम् |
| शठः | शठा | शठम् |
| पराङ्मुखः | पराङ्मुखी | पराङ्मुखम् |
| असमर्थः | असमर्था | असमर्थम् |
| ह्रस्वः | ह्रस्वा | ह्रस्वम् |
| दीर्घः | दीर्घा | दीर्घम् |

**नये अव्यय** (New Indeclinables)—सम्प्रति, अहो

**नया मुहावरा** (New Idiom)—कालं नयति, नामशेषः

## अभ्यासः

**पाठगतम्–**

1. श्री कृष्ण दुर्योधन को सुयोधन क्यों कहते हैं (Why does Lord Krishna call Duryodhana as Suyodhana ?)
2. श्री कृष्ण ने किस प्रकार दुर्योधन को संभ्रम-युक्त किया ? (How did Lord Krishna confuse Duryodhana ?)

**भाषा व्याकरणं च–**

3. विधिलिङ् रूपों से स्थान-पूर्ति कीजिए (Fill in the blanks with विधिलिङ् forms)—

(क) अस्माकं देशे वीराः ........... (जन्) ।
(ख) वयं सर्वे काठिन्यानि ........... (सह्) ।
(ग) छात्राः एतानि कार्याणि ........... (कृ) ।
(घ) पक्षौ न्यायालयात् बहिः मा ........... (वि+वद्)
(ङ) स्वपुस्तकम् वयम् ........... (पठ्) ।

4. यथापृष्ट रूप लिखिए (Give forms as asked)—

| | स्त्री० | नपुंसक० |
|---|---|---|
| नामशेषः | ............... | ............... |
| आदिमः | ............... | ............... |
| प्रियंकरः | ............... | ............... |
| मेधावी | ............... | ............... |
| वार्षिकः | ............... | ............... |

## संस्कृत-लेखनम्—

5. उत्तर दीजिए (Answer)—
(क) दूतः दुर्योधनाय प्रथमं किमकथयत् ?
(ख) दुर्योधनः श्रीकृष्णाय किमर्थम् अक्रुध्यत् ?
(ग) किं कौरवाः श्रीकृष्णेन सह अयुध्यन्त, तेषा च किमभवत् ?
(ङ) दुर्योधनम् आगतं दृष्ट्वा श्रीकृष्णः किमकरोत् ?

6. अनुवाद कीजिए (Translate)—
(क) पाण्डवों ने जंगल में समय बिताया । (Pandavas spent time in a forest.)
(ख) पाण्डवों का कौरवों के साथ यह समझौता हुआ । (Pandavas had this agreement with Kauravas.)
(ग) पैतृक सम्पत्ति का हमारा अंश दिया जाए । (We should be given our share of the paternal property.)
(घ) इस प्रकार कुरुकुल का नाम ही बाकी बचेगा । (Thus the Kuru family's name alone will be saved.)
(ङ) अहो, अब आप भी आ गए । (Wow ! now you too have come !)

□□

*Teaching Point:*
विद्वस्—declension

पञ्चदशः पाठः

# मैक्समूलरः

भुवन-प्रथित विद्वान् विद्वद्-धौरेय सुप्रथित
वाद्यम् वि+स्मि (स्मय्) प्रवृत्त प्रभृति
परिशीलनम् भाषान्तरम् कृतिः अनु+रंज्



विदेशेषु अपि अनेके भुवन-प्रथिताः संस्कृत-विद्वांसः अजायन्त, यथा—सर विलियम जोन्स, डा० जे०जी०बूलर, वैलण्टाइन, कीलहार्न-मोनियर विलियम, डा० हर्मन जैकोबी, मैक्समूलर मैकडानल, कीथ—प्रभृतयः। एतेषु विद्वत्सु विद्वद्-धौरेयस्य मैक्समूलरस्य नाम भारते सर्वत्र सुप्रथितम्।

मैक्समूलर 1823-तमे वर्षे अजायत। सः मातृभक्तः आसीत्। शैशवे मैक्समूलराय संगीतम् अतीव प्रियमासीत्। 'पियानो' तस्य प्रियं वाद्यम् अवर्तत। यदा मैक्समूलरः विश्वविद्यालये छात्रः आसीत् तदा एकदा ऋग्वेदं पठित्वा सः भृशं व्यस्मयत। तदैव एकदा फ्रांस-देशं गतः सः विदुषः वर्नफ-महोदयस्य वेद-विषयकाणि भाषणानि आकर्णयत्। तदा प्रभृति वर्नफ-महोदयं स गुरुम् अमन्यत संस्कृतस्य अध्ययनं प्रति च प्रवृत्तोऽभवत्। इंग्लैण्ड-देशस्य आक्सफोर्ड इति नाम विश्वविद्यालयमपि गत्वा सः संस्कृतस्यैव परिशीलनं कृतवान्।

तस्मिन् एव विश्वविद्यालये सः संस्कृतस्य प्राध्यापकोऽभवत्। ऋग्वेद-विषयकं स्वं कार्यं स तत्रैव प्रणीतवान्। अपि च, हितोपदेश-मेघदूतयोः भाषान्तरमपि तेन कृतम्। संस्कृत-साहित्यस्य इतिहासः संस्कृत-व्याकरणं चेति द्वौ ग्रन्थौ अपि तस्य कृती।

भारताय भक्तिः भारतीयेभ्यः च स्नेहस्तस्य हृदये सदैव अवर्तत। भारतीयाः अपि तस्मिन् अनुरज्यन्ते स्नेहेन च तं मोक्षमूलर इति कथयन्ति।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| भुवन-प्रथित | = | संसार-प्रसिद्ध | (world-famous) |
| विद्वस् | = | विद्वान | (scholar) |
| विद्वद्-धौरेय | = | श्रेष्ठ-विद्वान् | (best among scholars) |
| सुप्रथित | = | बहुत प्रसिद्ध | (very famous) |
| मातृ-भक्त | = | माता के प्रति भक्तिवाला | (devoted to ones mother) |
| वाद्यम् | = | संगीत-वाद्य | (musical instrument) |
| विश्वविद्यालयः | = | यूनीवर्सिटी | (university) |
| वि+स्मि (स्मय्) | = | चकित होना | (to be surprised) |
| अध्ययनम् | = | पढ़ाई | (study) |
| प्रवृत्त | = | लगा हुआ | (engaged) |
| परिशीलनम् | = | सतत अध्ययन | (constant pursuit) |
| विषयक | = | विषय-सम्बन्धित | (concerned with the subject) |
| प्रभृति | = | से लेकर | (from, ever since) |
| प्राध्यापकः | = | लेक्चरार | (lecturer) |
| भाषान्तरम् | = | अनुवाद | (translation) |
| व्याकरणम् | = | व्याकरण | (grammar) |
| कृतिः | = | रचना | (work) |
| भक्तिः | = | भक्ति | (devotion) |
| अनु+रज् | = | प्रेम करना | (to love) |

**नया रूप** (New Noun) - विद्वस् (पृष्ठ 87)

**नए उपसर्गयुक्त धातु** (New Prefixed Roots)

वि+स्मि (स्मय्) A, अनु+रंज् A

**नए विशेषण** (New Adjectives)

| | | |
|---|---|---|
| प्रथितः | प्रथिता | प्रथितम् |
| प्रवृत्तः | प्रवृत्ता | प्रवृत्तम् |

**नया अव्यय** (New Indeclinable)–प्रवृत्ति

**नया मुहावरा** (New Idiom)—विद्वद्-धौरेयः

**विशेषः**

**प्रभृति** के दो अर्थ–आदि, से लेकर। पहले अर्थ में विशेषण और दूसरे अर्थ में अव्यय है (प्रभृत्ति has two meanings— etc., since/from. In the first meaning it is an Adjective and in the second meaning, it is an indeclineable).

## अभ्यासः

### पाठगतम्

1. विदेशों के पाँच संस्कृत-विद्वानों के नाम बताइए (Give names of five foreign Sanskrit Scholars).

### भाषा व्याकरणं च

2. यथानिर्दिष्ट रूप लिखिए (Give forms as required)—

   विद्वस् (द्वितीया, तृतीया, षष्ठी)
   गो (चतुर्थी, पञ्चमी, सप्तमी)
   महत् (प्रथमा, षष्ठी, सम्बोधन)

3. णिजन्त रूप लिखिए—खन्, नश्, कृ, लिख्, श्रु

### संस्कृत लेखनम्—

4. उत्तर दीजिए (Answer)—
   (क) मैक्समूलरः संस्कृतं प्रति कथं प्रवृत्तोऽभवत् ?
   (ख) मैक्समूलरेण किं किं लिखितम् ?

5. अनुवाद कीजिए (Translate)—
   (क) विदेशों में मैक्समूलर आदि अनेक विद्वान हुए । (In foreign countries, there were many Sanskrit scholars like Max Muller).
   (ख) लक्ष्मीबाई आदि नारियाँ भी आजादी के लिए लड़ीं । (Women like Lakshmibai fought for freedom.)
   (ग) क्या जीवन में धन आदि ही सब कुछ है ? (Is money everything in life ?)
   (घ) मैक्समूलर विद्वानों में श्रेष्ठ है । (Max Muller is the best among scholars.)
   (ङ) हम विद्वानों का आदर करें । (We should respect scholars.)

□□

*Teaching Point:*

(i) स्वर + घोष (ii) आत्मन् – dec.

(except अ, आ) ↓ र्

षोडशः पाठः

# गीता

| | | | | |
|---|---|---|---|---|
| दोग्धा | भोक्ता | परि+त्यज् | व्रज् | लक्षणम् |
| धनुर्धरः | भूतिः | ध्रुव | छिद् | क्लेदय् |
| शोषय् | सम्+भू | ग्लानिः | अभ्युत्थानम् | सृज् |




## गीता-प्रशंसा

सर्वोपनिषदो गावः दोग्धा गोपाल-नन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ।।

## ईश्वरस्य आदेशः

सर्व-धर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ।।

## विजय-लक्षणम्

यत्र योगेश्वरः कृष्णः यत्र पार्थो धनुर्धरः ।
यत्र श्रीर्विजयो भूतिः ध्रुवा नीतिर्मतिर्मम ।।

## आत्मनः अमरता

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः।।

## ईश्वर-प्रतिज्ञा

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्म-संस्थापनार्थाय संभवामि युगे-युगे ।।
यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ।।

## शब्दार्थाः

दोग्धृ = दोहने वाला (milk-man)

| | | | |
|---|---|---|---|
| गोपाल नन्दन | = | ग्वालों का प्रिय (श्रीकृष्ण) | (beloved of cowmen—Krishna) |
| पार्थः | = | पृथा-पुत्र अर्जुन | (Pritha's son Arjuna) |
| वत्सः | = | बछड़ा | (calf) |
| सुधीः | = | विद्वान् | (wise) |
| भोक्तृ | = | भोगने वाला | (enjoyer) |
| अमृतम् | = | अमृत | (nectar) |
| आदेशः | = | आज्ञा | (order) |
| परि+त्यज् | = | छोड़ना | (to leave) |
| व्रज् | = | जाना | (to go) |
| शुचः | = | शोक करो! | (griee!) |
| लक्षणम् | = | निशानी, परिभाषा | (sign) |
| योगेश्वरः | = | योगीराज | (king of yogis) |
| धनुर्धरः | = | धनुर्धारी | (archer) |
| श्रीः | = | लक्ष्मी | (fortune) |
| भूतिः | = | ऐश्वर्य | (prosperity) |
| ध्रुवा | = | निश्चित | (determined) |
| नीतिः | = | नीति, विचार | (policy, thought) |
| अमरता | = | अमरता | (immortality) |
| छिद् | = | काटना | (to cut) |
| पावकः | = | आग | (fire) |
| क्लेदय् | = | गीला करना | (to make wet) |
| आपः | = | जल | (water) |
| शोषय् | = | सुखाना | (to dry) |
| मारुतः | = | हवा | (air) |
| प्रतिज्ञा | = | व्रत | (vow) |
| परित्राणम् | = | रक्षा | (protection) |
| विनाशः | = | नाश | (destruction) |
| दुष्कृताम् | = | दुष्टों का | (of wickeds) |
| संस्थापनम् | = | स्थापना | (establishment) |
| अर्थाय | = | लिए | (for) |
| सम्+भू | = | जन्म लेना | (to be born) |
| ग्लानिः | = | नाश, क्षय | (decline) |
| भारतः | = | भरत-वंशी | (one born in the family of Bharatas) |

| | | |
|---|---|---|
| अभ्युत्थानम् | = उत्थान | (uplift) |
| अधर्मः | = अधर्म | (non-righteousness) |
| सृज् | = पैदा करना | (to create) |

**नया रूप** (New Noun)—आत्मन् (पृष्ठ 88)

**नए धातु** (New Roots)—व्रज्, छिद्, क्लेदय्, शोषय्, सृज्

**नए उपसर्ग-युक्त धातु** (New Prefixed Roots)—परि+त्यज्, सम्+भू

**नए विशेषण** (New Adjectives)

| | | |
|---|---|---|
| भोक्ता | भोक्त्री | भोक्तृ |
| ध्रुवः | ध्रुवा | ध्रुवम् |

**विशेषः**

(i) 'युष्मद्' शब्द के द्वितीया विभक्ति एकवचन में दो रूप बनते हैं (Two forms of युष्मद् in second vibhakti singular—त्वाम्, त्वा)

(ii) जिसकी शरण में जाएँ, उसके वाचक शब्द में द्वितीया और 'शरण' शब्द में भी द्वितीया विभक्ति (Words for 'refuge' and 'the one whose refuse is sought'—both take second vibhakti)

(iii) सम्+भू के दो अर्थ (सम्+भू has two meanings)–सम्भव होना, जन्म लेना ।

## अभ्यासः

**पाठगतम्–**

1. श्रीकृष्ण और अर्जुन क्रमशः बुद्धि और बल के प्रतीक हैं । जहाँ बुद्धि और शारीरिक बल दोनों विद्यमान हों, वहाँ विजय निश्चित है । इसी भाव की व्याख्या कीजिए (Lord Krishna and Arjuna are symbols of intellect and physical strength respectively. Where both are present victory is certain. Elaborate this idea).

2. पहले श्लोक में किसकी उपमा किससे दी गई है ? (What is the simile in the first verse Who is being compared with whom ?)

**भाषा व्याकरणं च–**

3. संस्कृत-पर्याय दीजिए (Give Sanskrit equivalents)—

| | | | |
|---|---|---|---|
| आत्मा का, | आत्माओं में, | आत्मा से, | आत्माओं का, |
| हे आत्मा, | आत्मा के द्वारा, | आत्मा के लिए | |

4. सन्धि या सन्धिविच्छेद कीजिए (Join or disjoin)—
उपनिषदो गाव., सुधीर्भोक्ता, मतिर्मम, ग्लानिः+भवति, हानिः+नास्ति, मेधाविनः+भवन्ति, बालः+अयम्, मुनिः+जयति

संस्कृत-लेखनम्—

5. उत्तर दीजिए (Answer)—
(क) ईश्वरस्य कः आदेशोऽस्ति ?
(ख) विजयस्य लक्षणं किं वर्तते ?
(ग) आत्मनः अमरता कथं सिध्यति ?
(घ) ईश्वरः कदा अवतरति ?

6. अनुवाद कीजिए (Translate)—
(क) गीता एक महान् पुस्तक है । (The Gita is a great book.)
(ख) आत्मा की अमरता को कौन खण्डित कर सकता है ? (Who can refute soul's immortality?)
(ग) ईश्वर की शरण में जाओ । (Go to God's shelter.)
(घ) धर्म की स्थापना के लिए श्रीकृष्ण जन्म लेते हैं । (Lord Krishna is born to establish righteousness.)
(ङ) शक्ति ही हमारे देश की निश्चित नीति हो । (Strength should be our country's definite policy.) □□



*Teaching Point :*
आत्मनेपद–लोट्-लृट्

सप्तदशः पाठः

# दुर्ललितः भरतः

दुर्ललित जृम्भ् गण् तापसी पीड्
स्नेहय् केसरिणी लंघ् (लंघय्) वि+रमय्
उटज स्पृह चेष्टितम् व्यपदेशः



**बालः** जृम्भस्व सिंह, दन्तान् ते गणयिष्ये !

**प्रथमा तापसी** अविनीत, कथम् एतान् पशून् पीडयसि ?

**नृपः** अतीव सुन्दरोऽयं बालः । अहो, सिंह-शावकेन सह खेलति । मे हृदयं सत्यं स्नेहयति ।

**द्वितीया तापसी** एषा केसरिणी त्वां लंघयति यदि तस्याः पुत्रकं न मुञ्चसि ।

**बालः** (सस्मितम्) अहो, भीतोऽस्मि (अधरं दर्शयति)

**नृपः** तेजस्वी अयं बालः ।

**प्रथमा तापसी** वत्स, एनं शावकं मुञ्च ! अपरं ते क्रीडनकं दास्यामि !

**बालः** कुत्र ? दीयताम् ? (हस्तं प्रसारयति)

**द्वितीया तापसी** हन्त, नार्हति एष शब्दमात्रेण विरमयितुम् । गम्यताम्, मदीये उटजे मृत्तिका-मयूरकः तिष्ठति । तम् अस्य कृते उपहर ?

**प्रथमा तापसी** तथा ? (निर्गच्छति)

बालः अनेनैव तावत् क्रीडिष्यामि (तापसी दृष्ट्वा हसति)

नृपः स्पृहयामि खलु दुर्ललिताय अस्मै ?

तापसी (नृपं दृष्ट्वा) भद्रमुख, आगच्छ, मोचय च एनं शवकम् । एष बालः मां तु न गणयति !

नृपः (बालमुपगम्य) भोः महर्षि-पुत्रक ! मा एवं कुरु !

तापसी भद्रमुख ! नायं ऋषि-कुमारकः ।

नृपः सत्यम्, अस्य आकारः चेष्टितमपि चैवं कथयति । तदा कोऽस्य व्यपदेशः ?

तापसी पुरुवंशीयः क्षत्रियः !

– कालिदास-कृत-शकुन्तलात्

## शब्दार्थाः

| | | | |
|---|---|---|---|
| दुर्ललित | = | शरारती | (mischievous) |
| जृम्भ् | = | जम्भाई लेना | (to yawn) |
| गण् | = | गिनना | (to count) |
| तापसी | = | तपस्विनी | (female ascetic) |
| अविनीत | = | ढीठ | (obstinate) |
| पीड् | = | तंग करना | (to tease) |
| स्नेहय् | = | प्रेमयुक्त करना | (to make one affectionate) |
| केसरिणी | = | शेरनी | (lioness) |
| लघ् (लंघय्) | = | हमला करना | (to attack) |
| पुत्रकः | = | पुत्र | (son) |
| सस्मितम् | = | मुस्कुराहट के साथ | (with a smile) |
| अधरः | = | ओंठ (नीचे का) | (lower lip) |
| वत्सः | = | प्रिय बालक | (endearing child) |
| क्रीडनकम् | = | खिलौना | (toy) |
| मात्र | = | केवल | (mere, only) |
| वि+रमय् | = | रोकना | (to stop) |
| मदीय | = | मेरा | (my) |
| उटज | = | कुटिया | (cottage) |
| मृत्तिका | = | मिट्टी | (clay) |
| मयूरकः | = | मोर | (peacock) |
| उप+हृ | = | लाना | (to bring) |

| | | | |
|---|---|---|---|
| तथा | = | अच्छा ! | (right!) |
| स्पृह् | = | चाहना | (to long) |
| खलु | = | सचमुच | (truly) |
| भद्रमुखः | = | सुमुख | (good sir) |
| आकारः | = | शक्ल | (appearance) |
| चेष्टितम् | = | चेष्टा | (action) |
| व्यपदेशः | = | वंश | (family!) |
| वंशीय | = | वंश का | (belonging to family) |

नए धातु (New Roots)—

जृम्भ् A, गण् A, पीड्,
स्नेहय् लंघ् (लंघय्), स्पृह्,

नए उपसर्गयुक्त धातु (New Prefixed Roots)
वि+रमय्, उप+हृ

नए विशेषण (New Adjectives)—

| | | |
|---|---|---|
| दुर्ललितः | दुर्ललिता | दुर्ललितम् |
| अविनीतः | अविनीता | अविनीतम् |
| –मात्रः | –मात्रा | –मात्रम् |
| मदीयः | मदीया | मदीयम् |
| –मुखः | –मुखी | मुखम् |
| वंशीयः | वंशीया | वंशीयम् |

नए अव्यय (New Indeclinables)—तथा, खलु

कारक-विभक्तिः

'स्पृह्' धातु के योग में चाहे हुए व्यक्ति या वस्तु के वाचक शब्द में चतुर्थी विभक्ति (The word for a person or a thing longed for takes the fourth vibhakti when स्पृह् is used.)

**अभ्यासः**

पाठगतम्—

1. तापसी सिंहशावक को भरत से क्यों छुड़ाना चाहती है (Why does the ascetic woman want to free the cub from Bharata ? )

2. बच्चे को देखकर राजा के मन में क्या प्रतिक्रिया हुई ? (What was king's reaction after seeing the child ? )

भाषा व्याकरणं च–

3. जृम्भ् और गण् के लोट्लकार तथा लृट्लकार में रूप लिखिए (Conjugate जृम्भ् and गण् in लोट् and लृट्).

4. पद-परिचय दीजिए (Tell the base form and the following suffixes, etc.)
दर्शयति, प्रसारयति, विरमयितुम् दृष्ट्वा, दीयताम् ।

संस्कृत लेखनम्–

5. उत्तर दीजिए (Answer)—
(क) सिंह-शावकेन सह कः खेलति स्म ?
(ख) तापसी भरतं किमवदत् ?
(ग) प्रथमा तापसी द्वितीयायै किमुदितवती ?
(घ) भरतस्य व्यपदेशः कः आसीत् ?

6. अनुवाद कीजिए (Translate)–
(क) इन बालकों के लिए खिलौने लाओ । (Bring toys for these children.)
(ख) बच्चा माता-पिता के हृदय को स्नेह-युक्त करता है । (The child makes the parents' heart full of affection.)
(ग) शरारती बच्चा ओंठ दिखाता है । (The naughty child shows his lips
(घ) बेटा, मिट्टी से मत खेलो । (Son, don't play with clay.)
(ङ) कुटिया में कोई है ? (Is there anyone in the hermitage?) □□



*Teaching Point :*
त् + च
↓
च्

अष्टादशः पाठः

# संगीतम्

संगीत-प्रिय बि+नोदय् अन्तरेण उल्लेखः वीणा
वर्ण् (वर्णय्) शंखः वेणुः चित्तम् परिवर्तनम्
भेदः वादकः श्रेष्ठ सम्+मेलय्

जनः संगीत-प्रियः। कदाचित् स गीतं श्रुत्वा प्रसीदति, कदाचिच्च वाद्यानां संगीतेन आत्मानं विनोदयति।

प्राचीने साहित्ये अनेकानि वाद्यानि अन्तरेण उल्लेखोऽस्ति। एतानि वाद्यानि पञ्चशतात् अपि अधिकानि आसन्। वेदेषु यथा—दुन्दुभिः भूमि-दुन्दुभिः, अदम्बरः, अदम्बर-घट्टः, अघातिः, करकरी, कन्दवीणा। रामायणेऽपि लवकुशौ वीणायाः संगीतेन सहैव रामायणं गीतवन्तौ। रावणस्य प्रासादेषु तु अनेकानि वाद्यानि वाल्मीकिना वर्णितानि। महाभारतेऽपि तथैव वाद्यानाम् उल्लेखः। शंखस्य प्रयोगोऽपि अत्र दृश्यते। श्रीकृष्णस्य पाञ्चजन्यः अर्जुनस्य च देवदत्तः इति शंखौ आस्ताम्। श्रीकृष्णस्य वेणुः कस्य चितं नाहरत्।

समयेन एतेषु वाद्येषु अपि परिवर्तनं विकासः च अभवताम्। अद्यत्वेऽपि अनेकानि वाद्यानि प्रचलितानि, यथा—इयं वीणा। उत्तरभारतीयायां दक्षिणभारतीयायां च वीणायाम् अस्ति कश्चित् भेदः।



अयं सितारः। मुग़लकाले अस्य वाद्यस्य विकासोऽभवत्। पंडित रविशंकरोऽस्ति विश्व-विश्रुतः सितार-वादकः।



इयं शहनाई । श्री बिस्मिल्लाखां अस्ति श्रेष्ठः शहनाई-वादकः ।

एतान् अतिरिच्य मृदंग-तबला-पखध्वजः-इकतारा-गोपीचन्द-सारंगी-इसराज-



इत्यादीनि अनेकानि वाद्यानि । एतानि वाद्यानि सम्मेल्य अपि वाद्यन्ते । तच्च यन्त्र-सम्मेलनं वाद्यवृन्दं वा कथ्यते ।

**शब्दार्थाः**

| | | | |
|---|---|---|---|
| संगीत-प्रिय | = | संगीत-प्रिय | (lover of music) |
| वि+नोदय् | = | दिल बहलाना | (to entertain) |
| अन्तरेण | = | के विषय में | (about) |
| उल्लेखः | = | उल्लेख | (mention) |

| | | | |
|---|---|---|---|
| वीणा | = | वीणा | (*Veena,*) |
| वर्ण् (वर्णय्) | = | वर्णन करना | (to describe) |
| शंखः | = | शंख | (conch-shell) |
| वेणुः | = | बाँसुरी | (flute) |
| चित्तम् | = | हृदय | (heart) |
| परिवर्तनम् | = | तबदीली | (change) |
| भेदः | = | फ़र्क | (difference) |
| वादकः | = | बजाने वाला | (instrument-player) |
| श्रेष्ठ | = | सबसे अच्छा | (best) |
| सम्+मेलय् | = | मिलाना | (to assemble) |

नया धातु (New Root)—वर्ण् (वर्णय्)

नए उपसर्गयुक्त धातु (New Prefixed Roots)—
वि+नोदय्, सम्+मेलय्

**नए विशेषण** (New Adjectives)

| | | |
|---|---|---|
| –प्रियः | –प्रिया | –प्रियम् |
| वादकः | वादिका | वादकम् |
| श्रेष्ठः | श्रेष्ठा | श्रेष्ठम् |

नया अव्यय (New Indeclinable)—अन्तरेण

कारक-विभक्तिः

'अन्तरेण' के योग में आए शब्द में **द्वितीया विभक्ति** (The word coming with अन्तरेण takes the second vibhakti).

**अभ्यासः**

पाठगतम्–

1. साहित्य, संगीत और कला से हीन मनुष्य पशु के समान है–ऐसी एक प्राचीन संस्कृत उक्ति है । आपका क्या विचार है ? (A person without any knowledge of literature, music and art is like an animal. This is an old saying. What is your opinion ?)
2. **पाँच प्राचीन एवं पाँच नवीन वाद्यों के नाम बताइए** (Give names of five ancient and five modern musical instruments).

भाषा व्याकरणं च–

3. सन्धि या सन्धिच्छेद कीजिए (Join or disjoin)—
तच्च, कदाचित्+च, गजो धावति, नरोऽस्ति, गतिः+मम्, नीतिः+जगतः, वृक्षः+सः

4. पद-परिचय दीजिए (Give the base form, suffixes, etc.)—
वर्णितानि, रविशंकरोऽस्ति, अतिरिच्य, सम्मेल्य

संस्कृत-लेखनम्–

5. उत्तर दीजिए (Answer)—
(क) वाद्यानाम् उल्लेखः केषु पुस्तकेषु अधिगम्यते ?
(ख) विश्रुतस्य वादकस्य नाम लिख्यताम्–सितार, शहनाई ।
(ग) श्रीकृष्णस्य शंखस्य नाम किमासीत् ?
(घ) अर्जुनस्य शंखस्य नाम किमासीत् ?

6. अनुवाद कीजिए (Translate)–
(क) आज रेडियो पर रविशंकर का कार्यक्रम है । (On today's radio there is Ravi Shankara's programme.)
(ख) संगीत सुन कर सब का चित्त प्रसन्न होता है । (Everyone feels pleased after listening to music.)
(ग) शायद वह आज आ जाए । (He might come today.)
(घ) तुम सब क्यों नहीं पुरस्कार पाओगे ? (Why won't you all get the reward ?)
(ङ) दूरदर्शन लोगों का मन बहलाता है । (Television entertains people.)

□□



*Teaching Point :*

(i) : + च (ii) आः + घोष (iii) अः + स्वर (except अ)

↓ श् ↓ लोप ↓ लोप

नवदशः पाठः

# प्रकीर्ण-पद्यानि

| | | | |
|---|---|---|---|
| अव्+धारय् | सम्+आ+चर् | सवितृ | संपत्तिः |
| प्र+भू (भव्) | प्र+जन् | आतपः | सन्निमित्तम् |
| नियत | लघु-चेतस् | उदार-चरित | वसुधा |

## धर्म-लक्षणम्

श्रूयतां धर्म-सर्वस्वं, श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ।।

## महापुरुष-लक्षणम्

उदये सविता रक्तो रक्तश्चास्तमये तथा ।
संपत्तौ च विपत्तौ च महतामेकरूपता ।।

## लोभ-निन्दा

लोभात् क्रोधः प्रभवति, लोभात् कामः प्रजायते ।
लोभात् मोहश्च नाशश्च, लोभः पापस्य कारणम् ।।

## परोपकार-प्रशंसा

छायामन्यस्य कुर्वन्ति, तिष्ठन्ति च स्वयमातपे ।
फलान्यपि परार्थाय, वृक्षाः सत्पुरुषा इव ।।
धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत् ।
सन्निमित्ते वरं त्यागो विनाशे नियते सति ।।

## उदार-चरित-लक्षणम्

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ।।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| अव+धारय् | = | समझना | (to understand) |
| प्रतिकूलम् | = | अप्रिय | (unpleasant) |

| | | | |
|---|---|---|---|
| सम्+आ+चर् | = | व्यवहार करना | (to practise, perform) |
| उदयः | = | उदय | (rise) |
| सवितृ | = | सूरज | (sun) |
| अस्तमय | = | अस्त होने वाला | (setting) |
| संपत्तिः | = | ऐश्वर्य | (prosperity) |
| क्रोधः | = | क्रोध | (anger) |
| प्र +भू (भव्) | = | पैदा होना | (to originate) |
| प्र+जन् | = | पैदा होना | (to originate) |
| मोहः | = | मोह | (delusion) |
| नाशः | = | नाश | (ruin) |
| आतपः | = | धूप | (sunshine) |
| सत्पुरुषः | = | अच्छा पुरुष | (gentleman) |
| उत्+सृज् | = | छोड़ना | (to leave) |
| सन्निमित्तम् | = | अच्छा उद्देश्य | (good cause) |
| वरम् | = | अच्छा | (better) |
| त्यागः | = | त्याग | (sacrifice) |
| नियत | = | निश्चित | (inevitable) |
| सति | = | होने पर | (on being) |
| उदार-चरित | = | उदार हृदय | (broad-minded) |
| निजः | = | अपना | (one's own) |
| लघुचेतस् | = | छोटे दिल वाला | (narrow-minded) |
| वसुधा | = | पृथ्वी | (the earth) |
| कुटुम्बकम् | = | परिवार | (family) |

**नया रूप** (New Form) पर– like तद्म या किम्

**नए उपसर्गयुक्त धातु** (New Prefixed Roots)

अव+धारय्  प्र+भू (भव्)

सम्+आ+चर्  उत् + सृज्

**नये विशेषण** (New Adjectives)—

| | | |
|---|---|---|
| –मयः | मयी | –मयम् |
| नियतः | –नियता | नियतम् |
| उदार-चरितः | उदार-चरिता | उदार-चरितम् |
| लघुचेताः | लघुचेताः | लघुचेतः |

## अभ्यासः

### पाठगतम्–

1. आत्मनः प्रतिकूलानि परेषां न समाचरेत्–यह धर्म का सार बताया गया है। आपकी क्या राय है ? (This is said to be the essence of religion. What is your opinion ? )
2. सन्निमित्ते वरं त्यागो विनाशे नियते सति–इन शब्दों को आधार बना कर एक छोटा-सा निबन्ध लिखिए (Write a short essay based on the above words).

### भाषा व्याकरणं च–

3. सन्धि या सन्धिविच्छेद कीजिए (Join or disjoin)
चैव, वृक्षाः+अपि, मोहः+च, सत्पुरुषा इव, निजः जनः, पुरुषोऽस्ति, हरिश्च, मदीयः+तु, आतपः+सवितुः, वसुधा+एव, इति+अति, चापि, अन्वसरत् ।

### संस्कृत-लेखनम्–

4. उत्तर दीजिए (Answer)—
(क) वृक्षा कथं परेषाम् उपकारं कुर्वन्ति ?
(ख) धर्मस्य लक्षणम् किम् ?
(ग) महापुरुषस्य लक्षणं किमस्ति ?
(घ) उदार-चरितस्य लक्षणं किं वर्तते ?
(ङ) लोभेन का हानिर्भवति ?

5. अनुवाद कीजिए (Translate)—
(क) अच्छे पुरुषों की संपत्ति दूसरों के लिए होती है। (Wealth of good people is for others.)
(ख) जो दूसरों को पीड़ित करता है, ईश्वर उसे पीड़ित करता है। (God causes pain to those who cause pain to others.)
(ग) जितना धन दे सकते हो उतना दो। (Give as much money as you can.)
(घ) सर्दी की ऋतु में आम का फल संभव नहीं है। (A mango tree is not possible (to grow) in winter.)
(ङ) प्रत्येक युग में ईश्वर जन्म लेता है। (In every age, God is born.)

□□

*Teaching Point :*
(i) शतृ (ii) गच्छत् – declension

विंशतितमः पाठः

# गृध्रः मार्जारः च

पश्चिम पक्षिन् दिवा प्र+स्था कृतज्ञता
दूष् (दूषय्) शुश्रुष् अभि+नि+विश् विविक्तम्
आ+रभ् द्वित्र शंकालु



कुत्रचित् वृक्षे आसीत् पश्चिमे वयसि वर्तमानः कश्चित् गृध्रः केचिच्च पक्षिणः । यदा दिवा पक्षिणः विहर्तुं प्रस्थिताः तदा वृक्षे एव तिष्ठन् अयं गृध्रः तेषां शावकान् रक्षति स्म । कृतज्ञतया सायं किंचित् भोजनं तस्मै यच्छन्तः पक्षिणः सुखेन कालम् अनयन् । एवमेव अगच्छत् महान् कालः ।

एकदा कश्चित् मार्जारः खगानां शावकान् खादितुं तत्रागच्छत् । तं दृष्ट्वा गृध्रः तमदूषयत् अचिरमेव च प्रणष्टुम् तस्मै अकथयत् । तदा मार्जारोऽवदत्–

'भगवन्! भवान् अपि एवं वदति । धर्मम् आचरतः भवतः ख्यातिं श्रुत्वा तु अहमत्र आगतः । भवति शुश्रूषितव्यमिति च मे बुद्धिः । परं भवान् अतिथिमेव दूषयति । अहं तु गंगायाः तीरे निवसन् प्रतिदिनं शास्त्राणि पठामि । धर्मं पालयन् च अहिंसाम् आचरामि । नित्यम् ईश्वरं चाभिनिविशते मे मनः । ज्ञानं लब्धुम् अहमत्र आगतवान् परं भवतः दुर्व्यवहारं पश्यन् अहमधुना किं करवाणि इति नावगम्यते इति ।

स्वप्रशंसाम् आकर्ण्य गृध्रः विनम्रोऽभवत् अकथयच्च–मार्जारः मांसरुचिर्भवति। अतोऽहम् एवम् अकथयम्। पर त्वं तु धर्मरुचिः। आगम्यताम्, तुभ्यं धर्मस्य उपदेशं दास्यामीति। ततः मार्जारः तत्रैव विविक्ते वृक्षस्य एकस्मिन् कोटरे वस्तुमारभत।

प्रतिदिनम् अवसरं लब्ध्वा मार्जारः तान् शावकान् अखादत्। द्वित्रेभ्यः एव दिनेभ्यः अनन्तरं पक्षिणः शंकालून् दृष्ट्वा मार्जारस्तु तूष्णीं प्राणश्यत्। गृध्रमेव हन्तारम् अवगच्छन्तः पक्षिणस्ततः तमेव अमारयन्।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| पश्चिम | = | अन्तिम | (last) |
| पक्षिन् | = | पक्षी | (bird) |
| गृध्रः | = | गीध | (vulture) |
| दिवा | = | दिन में | (during the day) |
| प्र+स्था | = | जाना | (to go) |
| कृतज्ञता | = | एहसान | (obligation) |
| मार्जारः | = | बिलाव | (he-cat) |
| दूष् (दूषय्) | = | गाली देना | (to abuse) |
| ख्यातिः | = | प्रसिद्धि | (fame) |
| शुश्रूष् | = | सेवा करना | (to serve) |
| नित्यम् | = | प्रतिदिन | (daily) |
| अभि+नि+विश् | = | मन लगाना | (to get inclined) |
| दुर्व्यवहार | = | बुरा बर्ताव | (ill-treatment) |
| मांसरुचिः | = | मांस में रुचि वाला | (interested in meat) |
| धर्मरुचिः | = | धर्म में रुचि वाला | (interested in religion) |
| विविक्तम् | = | एकांत | (lonely place) |
| कोटरम् | = | खोखल | (hollow of a tree) |
| आ+रभ् | = | आरम्भ करना | (to begin) |
| अवसरः | = | मौका | (opportunity) |
| द्वित्र | | दो-तीन | (two or three) |
| शंकालु | = | शंका-युक्त | (suspicious) |

नया रूप (New Form)—गच्छत् (पृष्ठ 88)

नए धातु (New Roots)—दूष् (दूषय्), शुश्रूष् A

**नये उपसर्ग-युक्त धातु** (New Prefixed Roots)

प्र+स्था A, अभि+नि+विश् A, आ+रभ् A

**नये विशेषण** (New Adjectives)

| | | |
|---|---|---|
| पश्चिमः | पश्चिमा | पश्चिमम् |
| मांसरुचिः | मांसरुचिः | मांसरुचि |
| धर्मरुचिः | धर्मरुचिः | धर्मरुचि |
| द्वित्राः (नित्य बहुवचन) | द्वित्राः | द्वित्राणि |
| शंकालुः | शंकालुः | शंकालु |

**नये अव्यय** (New Indeclinables)—दिवा, नित्यम् ।

**कारक विभक्तिः**

'अभि+नि+विश्' के योग में आए शब्द में द्वितीया विभक्ति (The word coming with अभिनिविश् takes the second vibhakti).

**नया मुहावरा** (New Idiom)—पश्चिमे वयसि वर्तमानः

## अभ्यासः

**पाठगतम्**

1. मनुष्य की सबसे बड़ी कमज़ोरी अपनी प्रशंसा सुनना है । अपनी प्रशंसा सुन कर अच्छे-अच्छे लोग दूसरे के बस में हो जाते हैं । इस कहानी के आधार पर इस भाव का विस्तार कीजिए (A human beings greatest weakness is to listen to one's own praise. The strongest people can be controlled through praise. Expand this idea on the basis of this story.)

2. गीध का क्या दोष था ? (What was the vulture's fault?)

**भाषा व्याकरणं च**

3. एक-एक वाक्य बनाइए (Make a sentence with each)—
   अभिनिविश्, पश्चिमे वयसि वर्तमानः, पण्डित-पुरन्दरः, विद्वद्धौरेयः, देवः वर्ष्

4. शत्रन्त रूपों से स्थान पूर्ति कीजिए (Fill in the blanks with शतृ forms)—
   (क) विद्यालयं ........ (गम्) बालान् पश्य ।
   (ख) कथाः ........ (लिख्) लेखकाः ख्यातिं लभन्ताम् ।
   (ग) कार्यं ........ (कृ) नरः भद्राणि पश्यति ।

(घ) ग्रामे ........ (स्था) सा प्रसीदति ।
(ङ) देवं ........ (नम्) नरौ जयताम् ।
(च) दानम् ........ (आ+चर्) नरस्य उन्नतिर्भवति ।

5. गच्छत् के रूप लिखिए (Decline गच्छत्)

**संस्कृत लेखनम्–**

6. अनुवाद कीजिए (Translate)—
   (क) विद्या में रुचि वाला मनष्य विद्वान हो जाता है । (One interested in knowledge becomes a scholar.)
   (ख) हम दो-तीन दिनों के लिए गाँव जाएँगे । (We will go to the village for a couple of days.)
   (ग) यह बूढ़ा आदमी अध्ययन से बड़ा प्रेम करता है । (This old man loves studying.)
   (घ) धीरे-धीरे बहुत समय बीत गया । (Gradually a lot of time passed.)
   (ङ) दिन में वे घूमने निकले । (During the day, they went out for a walk.)
   (च) वह चलता हुआ खा रहा है । (He is eating while walking.)

□□



*Teaching Point:*
जगत्– declension

एकविंशतितमः पाठः

# भारतीया संस्कृतिः

जगत् चिन्तनधारा वि+शिष् अन्तरेण निदर्शनभूत
सहिष्णुता प्रापक लक्ष्यम् अन्ततः अवलम्बिन्
अनुव्रत कलहाय् प्र+यत् रम् सत्कारः सम्+मानय्



जगति कस्या अपि जातेः काचित् चिन्तनधारा संस्कृतिः वा भवति यया सा जातिः अन्याभ्यः विशिष्यते। संस्कृतिमन्तरेण न काऽपि जातिः राष्ट्रस्य रूपेण जीवति। भारतीयानामपि च स्वा विशिष्टा जीवनपद्धतिः चिन्तनपद्धतिश्च। अस्माकं संस्कृत्यां यानि कानिचित् प्रमुखानि वैशिष्ट्यानि सन्ति, तेषु एव निदर्शन-भूतानि कानिचित् वयं विचारयिष्यामः।

भारतीयस्य जीवनस्य प्रथमं वैशिष्ट्यमस्ति–परमधर्म-सहिष्णुतेति। भारतीयाः अनुभवन्ति यत् जगतः सर्वे एव धर्माः ईश्वर-प्रापकाः मोक्ष-प्रापकाः वा। सर्वे धर्माः एकमेव लक्ष्यम् अन्ततः गच्छन्ति। एतत् एव कारणं यत् अनेकेषां धर्माणाम् अवलम्बिनः परस्परमनुव्रताः अत्र स्नेहेन वसन्ति परस्परं च न कलहायन्ते।

द्वितीयं वैशिष्ट्यमस्ति–आत्मशुद्धिरिति। आत्म-शुद्ध्यै एव स्थाने-स्थाने सत्संगा भवन्ति। रागं द्वेषं च त्यजत, दयां परोपकारं च नित्यं कुरुत–इत्यादिभिः उपदेशैः जनाः तथा भवितुं प्रयतन्ते।

सन्तोष एव सुखस्य कारणमिति सर्वत्र उपदिश्यते, एतमेव च सर्वशास्त्राणां मूलम् । निर्मल-चित्ताय निर्मल-शरीरमपि आवश्यकम् । प्रतिदिनं सूर्योदयात् प्राक् जागरणं, प्रतिदिनं



स्नानं, दन्तधावनं, निर्मल-वस्त्राणां च धारणम् इत्यादयः गुणाः शरीरमपि पुष्टं स्वस्थं च कुर्वन्ति ।

तृतीयं वैशिष्ट्यमस्ति–नारी-सम्मानमिति । 'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः' इति मनूक्तिः । सर्वत्र नारीषु आदरभावः अस्माकं संस्कृतिः । यथा मातुःसम्मानं क्रियते, तथैव अन्यासां नारीणामपि स्यात् इत्यावश्यकम्। 'मातृवत् परदारेषु' इति सारः।



चतुर्थं वैशिष्ट्यमस्ति-अतिथि-सत्कार इति । सर्वदेवमयः अतिथिः इति किञ्चित् शास्त्रम् । गृहमागतः अतिथिः अस्माकं सम्मानमर्हति । निर्धनोऽपि जनः यथाशक्ति जलेन मधुर -वचनैश्च तं सम्मानयितुं समर्थ एव ।



## शब्दार्थाः

| | | | |
|---|---|---|---|
| जगत् | = | संसार | (world) |
| चिन्तनधारा | = | विचार-पद्धति | (way of thinking) |
| वि+शिष् | = | भिन्न होना | (to be different) |
| अन्तरेण | = | बिना | (without) |
| विशिष्ट | = | विशेष | (special) |
| पद्धति | = | ढंग | (way) |
| निदर्शन-भूत | = | उदाहरण-रूप | (illustrative) |
| सहिष्णुता | = | सहनशीलता | (tolerance) |
| प्रापक | = | प्राप्त कराने वाला | (one that leads to) |
| मोक्ष | = | मुक्ति | (freedom from birth and death) |
| लक्ष्यम् | = | लक्ष्य | (destination) |
| अन्ततः | = | आख़िरकार | (ultimately) |
| अवलम्बिन् | = | अनुयायी | (follower) |
| अनुव्रत | = | निष्ठा-युक्त | (full of faith) |
| कलहाय् | = | झगड़ा करना | (to quarrel) |
| आत्मशुद्धिः | = | निज की सफ़ाई | (self-purification) |
| सत्संगः | = | सत्संग | (religious assembly) |
| द्वेषः | = | द्वेष | (hate, dislike) |
| प्र+यत् | = | यत्न करना | (to try) |
| सन्तोषः | = | सन्तोष | (contentment) |
| मूलम् | = | जड़ | (root) |
| जागरणम् | = | जागना | (waking up) |
| धारणम् | = | पहनना | (wearing) |
| पुष्ट | = | पुष्ट | (nourished) |
| सम्मानम् | = | इज़्ज़त | (honour) |
| रम् | = | प्रसन्न होना | (to rejoice) |
| देवता | = | देवता | (god) |
| आदरभाव | = | आदर | (respect) |
| सत्कारः | = | आवभगत | (hospitality) |
| –मय | = | युक्त | (made of) |

| | | | |
|---|---|---|---|
| निर्धन | = | ग़रीब | (poor) |
| सम्+मानय् | = | इज़्ज़त करना | (to respect) |

नया रूप (New Form)—जगत् (पृष्ठ 88)

नए धातु (New Roots)

कलहाय् A, रम् A

नए उपसर्गयुक्त धातु (New Prefixed Roots)—

प्र+यत् A, सम्+मानय्

नए विशेषण (New Adjectives)—

| | | |
|---|---|---|
| विशिष्टः | विशिष्टा | विशिष्टम् |
| —भूतः | —भूता | —भूतम् |
| प्रापकः | प्रापका | प्रापकम् |
| अवलम्बी | अवलम्बिनी | अवलम्बि |
| अनुव्रतः | अनुव्रता | अनुव्रतम् |
| निर्धनः | निर्धना | निर्धनम् |

नए अवयव—अन्तरेण, अन्ततः

विशेष :

'अन्तरेण' के दो अर्थ– *के विषय में, बिना* (अन्तरेण has two meanings — *about, without.*

## अभ्यासः

पाठगतम्

1. कुछ लोग कहते हैं कि भारतीय संस्कृति का पूरा पालन आज के युग में सम्भव नहीं है। परन्तु पाठोक्त चारों बातों में एक भी ऐसी नहीं जो कठिन लगती हो। आपकी क्या सम्मति है ? युक्तिसंगत उत्तर दीजिए (Some people say that observing every rule of the Indian culture in today's age is not possible. But among the four points discussed in this lesson there is not one that seems difficult to follow. What do you think? Support your answer with arguments.)

भाषा व्याकरणं च–

2. जगत् के रूप लिखिए (Decline जगत्).

3. 'पठ्' का एक रूप बनता है 'पठित्वा'। यहाँ कौन-सा प्रत्यय है ? इसी प्रकार के अन्य रूप बनाइए—

| | | | | |
|---|---|---|---|---|
| लिख्, | प्र+नम्, | आ+गम्, | लभ् | याच् |
| यत् | नम् | कृ, | क्षिप्, | प्रति+क्षिप् |

## संस्कृत-लेखनम्

4. उत्तर दीजिए (Answer)—
   (क) संस्कृत्याः किं महत्त्वं भवति ?
   (ख) भारते विविधानां धर्माणाम् अवलम्बिनः कथं स्नेहेन वसन्ति ?
   (ग) आत्मशुद्धिः कथं जायते ?
   (घ) नारी-सम्मानमन्तरेण मनुना किमुक्तम् ?

5. अनुवाद कीजिए (Translate)—
   (क) आखिरकार सबका लक्ष्य एक ही है। (Finally, everyone's aim is the same.)
   (ख) सूर्योदय से पहले उठना स्वास्थ्य के लिए अच्छा है। (Waking up before sunrise is good for health.)
   (ग) प्रत्येक संस्कृति दूसरी से भिन्न होती है। (Every culture is different from the other.)
   (घ) सन्तोष प्राप्त करो, यही सुख का मूल है। (Be content. This is the essence of religion.)
   (ङ) अतिथियों का आदर-सत्कार सबका धर्म है। (Showing hospitality to guests is everybody's duty.)

□□





*Teaching Point :*
Revision

द्वाविंशतितमः पाठः

# सूक्तयः

विप्र    नि+बुध्    प्र+वद्    मनीषिन्    परि+कीर्त्

भृ    जठर    स्वत्वम्    देहिन्

| | | |
|---|---|---|
| 1. | एकं सद् विप्रा बहुधा वदन्ति | (ऋग्वेदः) |
| 2. | भूत्यै जागरणम् अभूत्यै स्वपनम् | (यजुर्वेदः) |
| 3. | देवस्य पश्य काव्यम् | (सामवेदः) |
| 4. | जीवेम शरदः शतम् | (अथर्ववेदः) |
| 5. | संग्रमो वै क्रूरम् | (शतपथब्राह्मणम्) |
| 6. | श्रीर्वै राष्ट्रम् | (शतपथब्राह्मणम्) |
| 7. | असतो मा सद् गमय। तमसो मा ज्योतिर्गमय। मृत्योर्माऽमृतं गमय। | (बृहदारण्यकोपनिषद्) |
| 8. | यो वै भूमा तत्सुखम् नाल्पे सुखमस्ति | (छान्दोग्योपनिषद्) |
| 9. | न वित्तेन तर्पणीयो मनुष्यः | (कठोपनिषद्) |
| 10. | जाग्रत प्राप्य वरान् निबोधत | (कठोपनिषद्) |
| 11. | मंन्त्रमूलं च विजयं प्रवदन्ति मनीषिण : | (रामायणम्) |
| 12. | एकश्च अर्थान् न चिन्तयेत् | (महाभारतम्) |
| 13. | संभावितस्य चाकीर्तिः मरणाद् अतिरिच्यते | (गीता) |
| 14. | मन्त्र-रक्षणे कार्य-सिद्धिर्भवति | (कौटिल्याशास्त्रम्) |
| 15. | न दत्वा परिकीर्तयेत् | (मनुस्मृतिः) |
| 16. | आत्मनमेव मन्येत कर्त्तारं सुख-दुःखयो | (चरक-संहिता) |
| 17. | यावद् भ्रियेत जठरं तावत् स्वत्वं हि देहिनाम् | (श्रीमद्भागवतम्) |
| 18. | पुराणमित्येव न साधु सर्वम् | (मालविकाग्निमित्रम्) |

## शब्दार्थाः

| | | | |
|---|---|---|---|
| सत् | = | सत्य | (truth) |
| विप्रः | = | बुद्धिमान् पुरुष | (wise man) |
| बहुधा | = | अनेक प्रकार से | (in various ways) |
| अभूतिः | = | ऐश्वर्य का अभाव | (loss of prosperity) |
| स्वपनम् | = | सोना | (sleeping) |
| काव्यम् | = | काव्य | (poetry) |
| शरद् | = | वर्ष | (year) |
| वै | = | सचमुच | (truly) |
| क्रूरम् | = | अत्याचार | (cruelty) |
| असत् | = | असत्य | (falsehood) |
| तमस् | = | अँधेरा | (darkness) |
| ज्योतिः | = | प्रकाश | (light) |
| मृत्युः | = | मृत्यु | (mortality) |
| भूमा | = | अधिक | (enough) |
| तर्पणीय | = | सन्तुष्ट | (satisfied) |
| जागृ | = | जागना | (to wake up) |
| वरः | = | श्रेष्ठजन | (best person) |
| नि+बुध | = | जानना, समझना | (to know,to understand) |
| मन्त्र-मूल | = | सलाह/रहस्य है मूल में जिसके | (one that has consultation/secrecy at its root) |
| प्र+वद् | = | कहना | (to say) |
| मनीषिन् | = | विचारशील | (thoughtful) |
| अर्थः | = | धन | (money) |
| सम्भावित | = | सम्मानित | (respected) |
| अकीर्तिः | = | अपयश | (bad name) |
| मरणम् | = | मृत्यु | (death) |
| सिद्धिः | = | सफलता | (success) |
| परि+कीर्त् | = | घोषणा करना | (to announce) |
| कर्तृ | = | करने वाला | (doer) |
| भृ | = | भरना | (to fill) |
| जठरम् | = | पेट | (belly) |
| स्वत्वम् | = | धन | (wealth) |

| | | | |
|---|---|---|---|
| देहिन् | = | शरीरधारी | (human being) |
| पुराण | = | पुराना | (old) |
| साधु | = | अच्छा | (good) |

**नया धातु** (New Root)— जागृ, भृ

**नए उपसर्गयुक्त धातु** (New Prefixed Roots)

नि+बुध (बोध्), प्र+वद्, परि+कीर्त् (कीर्तय्)

**नए विशेषण** (New Adjectives)

| | | |
|---|---|---|
| तर्पणीयः | तर्पणीया | तर्पणीयम् |
| मनीषी | मनीषिणी | मनीषि |
| सम्भावितः | सम्भाविता | सम्भावितम् |
| कर्ता | कर्त्री | कर्तृ |
| देही | देहिनी | देहि |
| पुराणः | पुराणा | पुराणम् |
| साधुः | साध्वी | साधु |

**नए अव्यय** (New Indeclinables) बहुधा, वै

## अभ्यासः

**पाठगतम्—**

1. आपको सबसे सुन्दर सूक्ति कौन-सी लगी और क्यों ? (Which is the most beautiful saying according to you, and why ? )

2. क्या पहली सूक्ति का इसी पुस्तक के किसी अन्य पाठ से सम्बन्ध है ? यदि हाँ तो क्या ? स्पष्ट कीजिए। (Does the first saying has any connection with any other lesson in this book ? If yes, what is that ? State your point clearly.)

**भाषा व्याकरणं च—**

3. 'बहुधा' शब्द की तरह 'धा' प्रत्यय सब संख्यावाची शब्दों के बाद लग सकता है। निम्नलिखित संख्याओं के बाद लगाइए। The suffix धा as in बहुधा can be attached with other numerals. Attach it with the following)—

एक, द्वि, त्रि, चतुः, पञ्च, शत।

4. भूतिः–अभूतिः, सत्–असत्, कीर्तिः–अकीर्तिः– इन शब्दों की रचना में कोई समानता है तो स्पष्ट कीजिए। क्या इस प्रकार अन्य शब्द भी बनाए जा सकते हैं ? यदि हाँ, तो उदाहरण देकर स्पष्ट कीजिए। (What is common in these pairs of words ? Can you think of other similar words ? Give examples).

संस्कृत-लेखनम्–

5. अनुवाद कीजिए (Translate)—

(क) राष्ट्र में सम्पत्ति हो।

May there be wealth in the nation.

(ख) मनुष्य केवल धन से सन्तुष्ट क्यों नहीं होता है ?

Why a human being is not satisfied with money alone ?

(ग) रहस्य की रक्षा करने से सफलता प्राप्त होती है।

(Protecting a secret is the key to success.

(घ) हे ईश्वर, मुझे अन्धकार से प्रकाश की ओर ले चलो।

(Oh Lord ! take me from darkness to light.

(ङ) युद्ध है तो कठिन, लेकिन फिर भी हमारे सैनिक निश्चित जीतेंगे।

(The war is indeed difficult, but our warriors will certainly win.

□□



# व्याकरणम्
# (Grammar)

## संज्ञा शब्दाः

### तकारान्त-पुँल्लिग-शब्दः 'महत्'

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | महान | महान्तौ | महान्तः |
| द्वितीया ,, | महान्तम् | ,, | महतः |
| तृतीया ,, | महता | महद्भ्याम् | महद्भिः |
| चतुर्थी ,, | महते | ,, | महद्भ्यः |
| पञ्चमी ,, | महतः | ,, | ,, |
| षष्ठी ,, | ,, | महतोः | महताम् |
| सप्तमी ,, | महति | ,, | महत्सु |
| सम्बोधनम् | हे महन् | हे महान्तौ | हे महान्तः |

### ओकारान्त-पुंल्लिग-शब्दः 'गो'

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | गौः | गावौ | गावः |
| द्वितीया ,, | गाम् | ,, | गाः |
| तृतीया ,, | गवा | गोभ्याम् | गोभिः |
| चतुर्थी ,, | गवे | ,, | गोभ्यः |
| पञ्चमी ,, | गोः | ,, | ,, |
| षष्ठी ,, | ,, | गवोः | गवाम् |
| सप्तमी ,, | गवि | ,, | गोषु |
| सम्बोधनम् | हे गौः | हे गावौ | हे गावः |

### सकारान्त पुंल्लिग-शब्दः 'विद्वस्'

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | विद्वान् | विद्वांसौ | विद्वांसः |
| द्वितीया ,, | विद्वांसम् | ,, | विदुषः |
| तृतीया ,, | विदुषा | विद्वद्भ्याम | विद्वद्भिः |
| चतुर्थी ,, | विदुषे | ,, | विद्वद्भ्यः |
| पञ्चमी ,, | विदुषः | ,, | ,, |
| षष्ठी ,, | विदुषः | विदुषोः | विदुषाम् |

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| सप्तमी विभक्तिः | विदुषि | विदुषो : | विद्वत्सु |
| सम्बोधनम् | हे विद्वन् | हे विद्वांसौ | हे विद्वांसः |

नकारान्त पुंल्लिग-शब्दः 'आत्मन्'

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | आत्मा | आत्मानौ | आत्मानः |
| द्वितीया " | आत्मानम् | " | आत्मनः |
| तृतीया " | आत्मना | आत्मभ्याम् | आत्मभिः |
| चतुर्थी " | आत्मने | " | आत्मभ्यः |
| पञ्चमी " | आत्मनः | " | " |
| षष्ठी " | " | आत्मनोः | आत्मनाम् |
| सप्तमी " | आत्मनि | " | आत्मसु |
| सम्बोधनम् | हे आत्मन् | हे आत्मानौ | हे आत्मानः |

तकारान्त पुंल्लिग-शब्दः 'गच्छत्'

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | गच्छन् | गच्छन्तौ | गच्छन्तः |
| द्वितीया " | गच्छन्तम् | " | गच्छतः |
| तृतीया " | गच्छता | गच्छद्भ्याम् | गच्छद्भिः |
| चतुर्थी " | गच्छते | " | गच्छद्भ्यः |
| पञ्चमी " | गच्छतः | " | " |
| षष्ठी " | गच्छतः | गच्छतोः | गच्छताम् |
| सप्तमी " | गच्छति | गच्छतोः | गच्छत्सु |
| सम्बोधनम् | हे गच्छन् | हे गच्छन्तौ | हे गच्छन्तः |

तकारान्त नपुंसकलिंग-शब्दः 'जगत्'

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | जगत् | जगती | जगन्ति |
| द्वितीया " | " | " | " |
| तृतीया " | जगता | जगद्भ्याम् | जगद्भिः |
| चतुर्थी " | जगते | " | जगद्भ्यः |
| पञ्चमी " | जगतः | " | " |
| षष्ठी " | " | जगतोः | जगताम् |
| सप्तमी " | जगति | " | जगत्सु |
| सम्बोधनम् | हे जगत् | हे जगती | हे जगन्ति |

## सर्वनाम-शब्दाः

तद्, एतद्, यत्, अन्य, सर्व, अनेक, पूर्व, किम्–

इन सर्वनाम शब्दों के रूप पिछली पुस्तकों में हम पढ़ आए हैं । प्रस्तुत 'इदम्' शब्द के रूप भी उनके रूपों में मिलते-जुलते हैं ।

### इदम्–यह (this) [पुँल्लिगम्]

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | अयम् | इमौ | इमे |
| द्वितीया " | इमम् | " | इमान् |
| तृतीया " | अनेन | आभ्याम् | एभिः |
| चतुर्थी " | अस्मै | " | एभ्यः |
| पञ्चमी " | अस्मात् | " | " |
| षष्ठी " | अस्य | अनयोः | एषाम् |
| सप्तमी " | अस्मिन् | " | एषु |

### इदम्–यह this (स्त्रीलिंगम्)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | इयम् | इमे | इमाः |
| द्वितीया " | इमाम् | " | " |
| तृतीया " | अनया | आभ्याम् | आभिः |
| चतुर्थी " | अस्यै | " | आभ्यः |
| पञ्चमी " | अस्याः | " | " |
| षष्ठी " | " | अनयोः | आसाम् |
| सप्तमी " | अस्याम् | " | आसु |

### इदम् (नपुंसकलिंगम्)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | इदम् | इमे | इमानि |
| द्वितीया " | " | " | " |
| तृतीया " | अनेन | आभ्याम् | एभिः |
| चतुर्थी " | अस्मै | " | एभ्यः |
| पञ्चमी " | अस्मात् | " | " |
| षष्ठी " | अस्य | अनयोः | एषाम् |
| सप्तमी " | अस्मिन् | " | एषु |

## धातवः

### नियमित-धातुः

**वन्द** (नमस्कार करना) आत्मनेपदम्

लट-लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | वन्दते | वन्देते | वन्दन्ते |
| मध्यमः पुरुष | वन्दसे | वन्देथे | वन्दध्वे |
| उत्तमः पुरुष | वन्दे | वन्दावहे | वन्दामहे |

लङ्-लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | अवन्दत | अवन्देताम् | अवन्दन्त |
| मध्यमः पुरुषः | अवन्दथाः | अवन्देथाम् | अवन्दध्वम् |
| उत्तमः पुरुषः | अवन्दे | अवन्दावहि | अवन्दामहि |

लृट्-लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | वन्दिष्यते | वन्दिष्येते | वन्दिष्यन्ते |
| मध्यमः पुरुषः | वन्दिष्यसे | वन्दिष्येथे | वन्दिष्यध्वे |
| उत्तमः पुरुषः | वन्दिष्ये | वन्दिष्यावहे | वन्दिष्यामहे |

लोट्-लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | वन्दताम् | वन्देताम् | वन्दन्ताम् |
| मध्यमः पुरुषः | वन्दस्व | वन्देताम् | वन्दध्वम् |
| उत्तमः पुरुषः | वन्दै | वन्दावहै | वन्दामहै |

विधिलिङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | वन्देत | वन्देयाताम् | वन्देरन् |
| मध्यमः पुरुषः | वन्देथाः | वन्देयाथाम् | वन्देध्वम् |
| उत्तमः पुरुषः | वन्देय | वन्देवहि | वन्देमहि |

### अर्धनियमित-धातुः

वृत्त (होना)

लट्-लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | वर्तते | वर्तेते | वर्तन्ते |

| | | | |
|---|---|---|---|
| मध्यमः पुरुषः | वर्तसे | वर्तेथे | वर्तध्वे |
| उत्तमः पुरुषः | वर्ते | वर्तावहे | वर्तामहे |

लङ्-लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | अवर्तत | अवर्तेताम् | अवर्तन्त |
| मध्यमः पुरुषः | अवर्तथाः | अवर्तेथाम् | अवर्तध्वम् |
| उत्तमः पुरुषः | अवर्ते | अवर्तावहि | अवर्तामहि |

लृट्-लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | वर्तिष्यते | वर्तिष्येते | वर्तिष्यन्ते |
| मध्यमः पुरुषः | वर्तिष्यसे | वर्तिष्येथे | वर्तिष्यध्वे |
| उत्तमः पुरुषः | वर्तिष्ये | वर्तिष्यावहे | वर्तिष्यामहे |

लोट्-लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | वर्तताम् | वर्तेताम् | वर्तन्ताम् |
| मध्यमः पुरुषः | वर्तस्व | वर्तेथाम् | वर्तध्वम् |
| उत्तमः पुरुषः | वर्ते | वर्तावहै | वर्तामहै |

विधिलिङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | वर्तेत | वर्तेयाताम् | वर्तेरन् |
| मध्यमः पुरुषः | वर्तेयाः | वर्तेयाथाम् | वर्तेध्वम् |
| उत्तमः पुरुषः | वर्तेय | वर्तेवहि | वर्तेमहि |

## अनियमित-धातुः

### शक् (सकना) परस्मैपदम्

लट्-लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | शक्तोति | शक्नुतः | शक्नुवन्ति |
| मध्यमः पुरुषः | शक्नोषि | शक्नुथः | शक्नुथ |
| उत्तमः पुरुषः | शक्नोमि | शक्नुवः | शक्नुमः |

लङ्-लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | अशक्नोत् | अशक्नुताम् | अशक्नुवन् |
| मध्यमः पुरुषः | अशक्नोः | अशक्नुतम् | अशक्नुत |
| उत्तमः पुरुषः | अशक्नवम् | अशक्नुव | अशक्नुम |

लृट्-लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | शक्ष्यति | शक्ष्यतः | शक्ष्यन्ति |
| मध्यमः पुरुषः | शक्ष्यसि | शक्ष्यथः | शक्ष्यथ |
| उत्तमः पुरुषः | शक्ष्यामि | शष्यावः | शक्ष्यामः |

लोट्-लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | शक्नोतु | शक्नुताम् | शक्नुवन्तु |
| मध्यमः पुरुषः | शक्नुहि | शक्नुतम् | शक्नुत |
| उत्तमः पुरुषः | शक्नुवानि | शक्नवाव | शक्नवाम |

विधिलिङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | शक्नुयात् | शक्नुयाताम् | शक्नुयुः |
| मध्यमः पुरुषः | शक्नुयाः. | शक्नुयातम् | शक्नुयात |
| उत्तमः पुरुषः | शक्नुयाम् | शक्नुयाव | शक्नुयाम |

# धातु-सूची

## नियमिताः

| क्र० | धातुः | लट् | लृट् | लङ् | लोट् | विधिलिङ् |
|---|---|---|---|---|---|---|
| 1. | वर्ष् | वर्षति | वर्षिष्यति | अवर्षत् | वर्षेत् | वर्षेत् |
| 2. | अर्ह् | अर्हति | अर्हिष्यति | आर्हत् | अर्हत् | अर्हेत् |
| 3. | लग् | लगति | लगिष्यति | अलगत् | लगतु | लगेत् |
| 4. | व्रज् | व्रजति | व्रजिष्यति | अव्रजत् | व्रजतु | व्रजेत् |
| 5. | क्लेदय् | क्लेदयति | क्लेदयिष्यति | अक्लेदयत् | क्लेदयतु | क्लेदयेत् |
| 6. | शोषय् | शोषयति | शोषयिष्यति | अशोषयत् | शोषयतु | शोषयेत् |
| 7. | स्नेहय् | स्नेहयति | स्नेहायिष्यति | अस्नेहयत् | स्नेहयतु | स्नेहयेत् |
| 8. | वन्द् A | वन्दते | वन्दिष्यते | अवन्दत | वन्दताम् | वन्देत |
| 9. | कम्प् A | कम्पते | कम्पिष्यते | अकम्पत | कम्पताम् | कम्पेत |
| 10. | बाध् A | बाधते | बाधिष्यते | अबाधत | बाधताम् | बाधेत |
| 11. | वेप् A | वेपते | वेपिष्यते | अवेपत | वेपताम् | वेपेत |
| 12 | याच् A | याचते | याचिष्यते | अयाचत | याचताम् | याचेत |
| 13. | यत् A | यतते | यतिष्यते | अयतत | यतताम् | यतेत |
| 14. | घट् A | घटते | घटिष्यते | अघटत | घटताम् | घटेत |
| 15. | ईक्ष् A | ईक्षते | ईक्षिष्यते | ऐक्षत | ईक्षताम् | ईक्षेत |
| 16. | सह् A | सहते | सहिष्यते | असहत | सहताम् | सहेत |
| 17. | जृम्भ् A | जृम्भते | जृम्भिष्यते | अजृम्भत | जृम्भताम् | जृम्भेत |
| 18. | शुश्रूष् A | शुश्रूषते | शुश्रूषिष्यते | अशुश्रूषत | शुश्रूषताम् | शुश्रूषेत |

| क्र० धातु: | लट् | लृट् | लङ् | लोट् | विधिलिंङ् |
| --- | --- | --- | --- | --- | --- |
| 19. कलहाय् A | कलहायते | कलहायिष्यते | अकलहायत | कलहायताम् | कलहायेत |
| 20. रम् A | रमते | रंस्यते | अरमत | रमताम् | रमेत |
| | | अर्धनियमिता: | | | |
| 21. भृ | भरति | भरिष्यति | अभरत् | भरतु | भरेत् |
| 22. खण्ड् | खण्डयति | खण्डयिष्यति | अखण्डयत् | खण्डयतु | खण्डयेत् |
| 23. मृष् | मृष्यति | मर्षिष्यति | अमृष्यत् | मृष्यतु | मृष्येत् |
| 24. गृध् | गृध्यति | गर्धिष्यति | अगृध्यत् | गृध्यतु | गृध्येत् |
| 25. हृष् | हृष्यति | हर्षिष्यति | अहृष्यत् | हृष्यतु | हृष्येत् |
| 26. सृज् | सृजति | स्रक्ष्यति | असृजत् | सृजतु | सृजेत् |
| 27. पीड् | पीडयति | पीडयिष्यति | अपीडयत् | पीडयतु | पीडयेत् |
| 28. लंघ् | लंघयति | लंघयिष्यति | अलंघयत् | लंघयतु | लंघयेत् |
| 29. स्पृह | स्पृहयति | स्पृहयिष्यति | अस्पृहयत् | स्पृहयतु | स्पृहयेत् |
| 30. वर्ण | वर्णयति | वर्णयिष्यति | अवर्णयत् | वर्णयतु | वर्णयेत् |
| 31. दूष् | दूषयति | दूषयिष्यति | अदूषयत् | दूषयतु | दूषयेत् |
| 32. भिद्य् A | भिद्यते | भेत्स्यते | अभिद्यत | भिद्यताम् | भिद्येत |
| 33. क्लिश् A | क्लिश्यते | क्लेशिष्यते | अक्लिश्यत | क्लिश्यताम् | क्लिश्येत |
| 34. वृत् A | वर्तते | वर्तिष्यते | अवर्तत | वर्तताम् | वर्तेत |
| 35. मन् A | मन्यते | मंस्यते | अमन्यत | मन्यताम् | मन्येत |
| 36. लभ् A | लभते | लप्स्यते | अलभत | अलभताम् | लभेत |
| 37. युध् A | युध्यते | योत्स्यते | अयुध्यत | युध्यताम् | युध्येत |
| 38. मृ A | म्रियते | मरिष्यते | अम्रियत | म्रियताम् | म्रियेत |
| 39. विद् A | विद्यते | वेत्स्यते | अविद्यत | विद्यताम् | विद्येत |
| 40. कम् A | कामयते | कामयिष्यते | अकामयत | कामयताम् | कामयेत |
| 41. शुभ् A | शोभते | शोभिष्यते | अशोभत | शोभताम् | शोभेत |
| 42. मुद् A | मोदते | मोदिष्यतें | अमोदत | मोदताम् | मोदेत |
| 43. जन् A | जायते | जनिष्यते | अजायत | जायताम् | जायेत |
| 44. गण A | गणयते | गणयिष्यते | अगणयत | गणयताम् | गणयेत |
| 45. रुच् A | रोचते | रोचिष्यते | अरोचत | रोचताम् | रोचेत |
| | | | अनियमिता: | | |
| 46. श्रु | शृणोति | श्रोष्यति | अशृणोत् | शृणोतु | शृणुयात् |
| 47. शक् | शक्नोति | शक्ष्यति | अशक्नोत् | शक्नोतु | शक्नुयात् |
| 48. ग्रह | गृह्णाति | ग्रहीष्यति | अगृह्णात् | गृह्णातु | गृह्णीयात् |
| 49. छिद् | छिनत्ति | छेत्स्यति | अच्छिनत् | छिनतु | छिन्द्यात् |
| 50. जागृ | जागर्ति | जागरिष्यति | अजागः | जागर्तु | जागृयात् |

नोट–अनियमित धातुओं में से केवल 'शक्' धातु के रूप ही पीछे पूरे दिए गए हैं। शेष धातुओं के कृदन्त रूप सरल हैं और इन्हीं कृदन्त रूपों का ही प्रसंग में प्रयोग किया गया है। छात्र इन्हीं कृदन्त रूपों का प्रयोग करें। (From among irregular verbs, only शक् is fully conjugated. The कृदन्त form of other irregular verbs are easy and are givenin appropriate contexts. Students are also encouraged to use कृदन्त forms.)

## उपसर्ग-युक्ताः धातवः

जैसा कि पहले बताया जा चुका है कि उपसर्ग-युक्त-धातुएँ संस्कृत में शब्द-भंडार को बढ़ाने की सबसे सरल विधि है। अब तक उनतीस उपसर्गयुक्त-धातुएँ पढ़ाई जा चुकी हैं। इस भाग में 54 धातुएँ और प्रयोग में आई हैं। (As discussed earlier, prefixed roots are an easy way to enrich Sanskrit vocabulary. Twenty-nine such roots have been introduced earlier. Another 54 are being introduced here.)

**आ**

| | | |
|---|---|---|
| 1. आ+क्रुश् | गाली देना | (to abuse) |
| 2. आ+रुह् | चढ़ना | (to ride) |
| 3. आ+या | आना | (to come) |
| 4. आ+श्रि | आश्रित होना | (to depend) |
| 5. आ+योजय् | आयोजन करना | (to organise) |
| 6. आ+रभ् A | आरम्भ करना | (to begin) |

**अनु**

| | | |
|---|---|---|
| 7. अनु+सृ | पीछे जाना | (to follow) |
| 8. अनु+रज् A | प्रेम करना | (to love) |

**अव**

| | | |
|---|---|---|
| 9. अव+लम्ब् A | सहारा लेना | (to cling, to support oneself on) |
| 10. अव+धारय् | समझना | (to understand) |

**अति**

| | | |
|---|---|---|
| 11. अति+रिच् A | पीछे छोड़ना, के इलावा | (to leave behind, in addition to) |

**उप**

| | | |
|---|---|---|
| 12. उप+स्थापय् | सामने रखना | (to present) |
| 13. उप+हृ | लाना | (to bring) |

**प्र**

| | | |
|---|---|---|
| 14. प्र+आप् | प्राप्त करना | (to obtain, to reach) |
| 15. प्र+हृ | आघात करना | (to hurt) |
| 16. प्र+नी | रचना करना | (to compose) |
| 17. प्र+शंस् | प्रशंसा करना | (to praise) |
| 18. प्र+ज्वालय् | जलाना | (to kindle) |
| 19. प्र+कटय् | प्रकट करना | (to show) |
| 20. प्र+चल् | प्रचलित होना | (to be prevalent) |
| 21. प्र+दा | देना | (to give) |

| | | |
|---|---|---|
| 22. प्र+भू | पैदा होना | (to originate, to be born) |
| 23. प्र+जन् A | पैदा होना | (to originate, to be born) |
| 24. प्र+स्था A | जाना | (to go) |
| 25. प्र+यत् A | यत्न करना | (to try) |
| 26. प्र+वद् | कहना | (to say) |
| 27. परि+त्यज् | छोड़ना | (to leave) |
| 28. परि+कीर्त् | घोषणा करना | (to announce) |
| **प्रति** | | |
| 29. प्रति+क्षिप् | दलील काटना | (to refute argument) |
| **नि** | | |
| 30. नि+वस् | रहना | (to live, reside) |
| 31. नि+वेदय् | निवेदन करना | (to offer) |
| 32. नि+कृत् | काटना | (to cut) |
| 33. नि+बुध् | जानना, समझना | (to know, to understand) |
| **वि** | | |
| 34. वि+वद् A | झगड़ा करना | (to dispute) |
| 35. वि+चारय् | विचार करना | (to think) |
| 36. वि+स्मि A | चकित होना | (to be surprised) |
| 37. वि+रमय् | रोकना | (to stop) |
| 38. वि+नोदय् | दिल बहलाना | (to entertain) |
| 39. वि+शिष् A | भिन्न होना | (to be different) |
| **उत्** | | |
| 40. उत् + लिख् | वर्णन करना | (to describe, mention) |
| 41. उत् + तुल् | फहराना | (to hoist) |
| 42. उत् + सृज् | छोड़ना | (to leave) |
| **सम्** | | |
| 43. सम्+भू | जन्म लेना, सम्भव होना | (to be born, to be possible) |
| 44. सम्+मेलय् | मिलाना | (to assemble something). |
| 45. सम्+मानय् | इज़्ज़त करना | (to respect) |
| 46. सम्+पद् A | सम्पन्न होना | (to be accomplished) |
| **अभि** | | |
| 47. अभि+वादय् | प्रणाम करना | (to salute) |
| **(अन्ये)** | | |
| 48. सम्+नि+पत् | इकट्ठे होना | (to assemble) |

| | | |
|---|---|---|
| 49. सम्+आ+चर् | व्यवहार करना | (to practise, to perform) |
| 50. अभि+नि+विश् | मन लगना | (to get interested) |
| 51. प्रमाणी +कृ | अपील करना | (to appeal) |
| 52. नमस्+कृ | नमस्कार करना | (to salute) |
| 53. तिरस्+कृ | तिरस्कार करना | (to despise) |
| 54. आधारी+कृ | आधार बनाना | (to base on) |

## सन्धिः

### 1. विसर्ग सन्धिः

सः    एषः + कोई व्यञ्जन (any consonant)
↓    ↓
विसर्गलोप विसर्गलोप

Examples : सः बालः = स बाल :    सः शुकः = स शुकः
एषः छात्रः = एष छात्रः    एषः देशः = एष देशः

But सः + अस्ति = सोऽस्ति
एषः + अमरः = एषोऽमरः

### 2. विसर्ग-सन्धिः

अः + घोषवर्णः
↓
ओ

Examples : गजः + गच्छति = गजो गच्छति
बालकः + नमति = बालको नमति
अन्यः + जनः = अन्यो जनः

But छात्रः + खेलति = छात्रः खेलति
ख घोषवर्ण नहीं है (ख is not a घोषवर्णः)

### 3. विसर्ग-सन्धिः

: + स्
↓
स्

Examples : मीन + तरति = मीनस्तरति
मुनयः + ते
साधोः + संगतिः = साधोस्संगतिः
रविः + तपति = रविस्तपति

### 4. स्वर-सन्धिः

पदान्त ए + अ
↓
ऽ

Examples : वने + अस्मिन् = वनेऽस्मिन्
अन्ये + अपि = अन्येऽपि

5. विसर्ग-सन्धिः

अ आ को छोड़ कर कोई स्वर + : + घोषवर्णः
(Any vowel excepting अ आ + : + घोषवर्ण :
↓
Examples : सुधीः + भोक्ता = सुधीर्भोक्ता
मुनिः + भवति = मुनिर्भवति

6. व्यंजन सन्धिः

त् + च्
↓
च्
Examples : तत् + च = तच्च
कदाचित् + च = कदाचिच्च

7. विसर्ग-सन्धिः

: + च्
↓
श्
Examples : मुनिः + च = मुनिश्च
बाला : + च = बालाश्च

8. विसर्ग-सन्धिः

आः + घोषवर्णः
↓
विसर्ग-लोपः
Examples : नराः + गच्छन्ति = नरा गच्छन्ति
लताः + एताः + = लता एताः

9. विसर्ग-सन्धिः

अः + स्वर (अ के सिवाय excepting अ)
↓
विसर्ग-लोपः

Examples : सिंहः + एषः = सिंह एषः
जनः + इच्छति = जन इच्छति

## वाच्य

1. कर्तृवाच्य—कर्त्ता प्रथमा विभक्ति में, कर्म द्वितीया विभक्ति में, क्रिया सदा कर्त्ता के अनुसार (कर्त्ता in प्रथमा, कर्म in द्वितीया, and verb according to कर्त्ता)

उदाहरण—बालः गीतां पठति ।

2. कर्मवाच्य–कर्त्ता तृतीया विभक्ति में, कर्म प्रथमा में, क्रिया सदा कर्म के अनुसार (कर्त्ता in तृतीया, कर्म in प्रथमा, and verb according to कर्म)

उदाहरण–बालैः गीता पठ्यते ।

कर्म यदि न हो तो (If there is no कर्म, then )–

क्रिया प्रथम पुरुष एकवचन (लकार क्रिया)

अथवा, क्रिया नपुसंकलिंग, प्रथमा वि०, एक व० (कृदन्त क्रिया) (verb in प्रथम पुरुष एकवचन form with लकार verb, or in नपुं०, प्रथमा वि०ए०व० with कृदन्त verb)–

उदाहरणम्–बालैः पठ्यते । बालैः पठितम् । बालैः पठितव्यम् ।

3. भाववाच्य–कर्त्ता तृतीया विभक्ति में, क्रिया प्रथम पुरुष एकवचन (लकार क्रिया) अथवा नपुंसकलिंग प्रथमा विभक्ति एकवचन (कृदन्त क्रिया) (कर्त्ता in तृतीया, and verb in प्रथम पुरुष एकवचन (लकार क्रिया) or नपुं० प्रथमा वि०ए०व० (कृदन्त क्रिया)

उदाहरणम्–बालैः हस्यते । बालैः हसितम् । बालैः हसितव्यम् ।

नोट–भाववाच्य में केवल अकर्मक धातुओं का ही प्रयोग होता है और कर्मवाच्य में केवल सकमर्क धातुओं का प्रयोग होता है (In भाववाच्य, only अकर्मक verbs are used, and in कर्मवाच्य, only सकमर्क verbs are used).

सकमर्क धातु–जिनके साथ कर्म आ सकता है । जैसे पट्, लिख् आदि (A verb capable of having an object, *e.g.*, पठ्, लिख्, etc.)

अकमर्क धातु–जिनके साथ कर्म आ ही नहीं सकता; जैसे हस्, स्था आदि (A verb **not** capable of having an object, e.*g.*, हस्, स्था, etc.)

नोट–धातु का कर्मवाच्य या भाववाच्य रूप बनाने के लिए धातु रूप के बाद **य** जोड़ दीजिए । ऐसी कर्मवाच्य धातु के रूप सदा आत्मनेपद में चलेंगे; जैसे-पठ्य, चल्य, खाद्य, के रूप बनेंगे–पठ्यते, चल्यते, खाद्यते । लृट् में य नहीं लगेगा; जैसे–पठिष्यते, चलिष्यते, खादिष्यते (In order to make the कर्मवाच्य or भाववाच्य form of a verb, add य after the root the conjugate in आत्मनेपदम्, *e.g.*, पाठ्य, चल्य, खाद्य becoming पठ्यते, चल्यते, खाद्यते, etc. (In लृट्, there will be no additional य in the middle.)

## कृदन्त प्रत्ययाः

1. क्तवतु– (i) a इसका प्रयोग भूतकाल के अर्थ में होता है (Used in past tense)

(ii) a इसका प्रयोग केवल कर्तृवाच्य में होता है (Used in कर्तृवाच्य)

(iii) a इसका प्रयोग क्रिया तथा विशेषण–दोनों रूपों में हो सकता है (Can be used as a verb as well as an adjective).

उदाहरण–बालः पठितवान् । (*क्रिया*) पठितवान् बालः गृहं गच्छति । (विशेषणम्)

पठ् + क्तवतु–पठितवत्

| | | | | |
|---|---|---|---|---|
| पुँ०– पठितवत्– | पठितवान् | पठितवन्तौ | पठिवन्तः | (like गुणवत्) |
| स्त्री– पठितवती– | पठितवती | पठितवत्यौ | पठितवत्यः | (like नदी) |
| नपुं०–पठितवत्– | पठितवत् | पठिवती | पठितवन्ति | (like जगत्) |

2. क्त – (i) इसका प्रयोग भी भूतकाल के अर्थ में होता है (Usedin past tense)

(ii) इसका प्रयोग कर्मवाच्य में होता है (Used in कर्मवाच्य)

(iii) गत्यर्थक धातुओं के साथ इसका प्रयोग कर्तृवाच्य या कर्मवाच्य दोनों में हो सकता है (Used in कर्तृवाच्य or कर्मवाच्य with गत्यर्थक verbs.

(iv) इसका प्रयोग क्रिया तथा विशेषण, दोनों रूपों में हो सकता है (used as a verb as well as an adjective)

उदाहरण–बालेन पुस्तकं पठितम् । बालेन हसितम् । बालः हसितः । पठितम् पुस्तकं कुत्रस्ति ?

पठ् + क्त = पठित

| | | | | |
|---|---|---|---|---|
| पुं०– पठित– | पठितः | पठितौ | पठिताः | (like देव) |
| स्त्री०–पठिता– | पठिता | पठिते | पठिताः | (like लता) |
| नपुं०– पठित– | पठितम् | पठिते | पठितानि | (like फल) |

3. तव्य– (i) इसका प्रयोग 'चाहिए' के अर्थ में होता है (Used in the sense of 'should'

(ii) इसका प्रयोग सदा कर्मवाच्य में होता है (Used in कर्मवाच्य)

(iii) इसका प्रयोग क्रिया तथा विशेषण, दोनों रूपों मे हो सकता है (Used as a verb as well as an adjective)

